# Shivasvarodayah

# શિવસ્વરોદયઃ

## Document Information

Text title : Shivasvarodayah

File name : shivasvarodayaH.itx

Category : shiva, yoga, jyotisha, sociology_astrology

Location : doc_shiva

Proofread by : Ruma Dewan

Latest update : November 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 19, 2026

*sanskritdocuments.org*

# શિવસ્વરોદયઃ

- ઉમામહેશ્વરસંવાદે -

અથ મઙ્ગલાચરણમ્ ।
મહેશ્વરં નમસ્કૃત્ય શૈલજાં ગણનાયકમ્ ।
ગુરું ચ પરમાત્માનં ભજે સંસારતારકમ્ ॥ ૧॥

અથ બ્રહ્માણ્ડનિર્ણયઃ ।
દેવ્યુવાચ ।
દેવદેવ મહાદેવ કૃપાં કૃત્વા મમોપરિ ।
સર્વસિદ્ધિકરં જ્ઞાનં વદયસ્વ મમ પ્રભો ॥ ૨॥

કથં બ્રહ્માણ્ડમુત્પન્નં કથં વા પરિવર્તતે ।
કથં વિલીયતે દેવ વદ બ્રહ્માણ્ડનિર્ણયમ્ ॥ ૩॥

ઈશ્વર ઉવાચ ।
તત્ત્વાદ્બ્રહ્માણ્ડમુત્પન્નં તત્ત્વેન પરિવર્તતે ।
તત્ત્વે વિલીયતે દેવિ તત્ત્વાદ્બ્રહ્માણ્ડનિર્ણયઃ ॥ ૪॥

દેવ્યુવાચ ।
તત્ત્વમેવ પરં મૂલં નિશ્ચિતં તત્ત્વવાદિભિઃ ।
તત્ત્વસ્વરૂપં કિં દેવ તત્ત્વમેવ પ્રકાશય ॥ ૫॥

ઈશ્વર ઉવાચ ।
નિરઞ્જનો નિરાકાર એકો દેવો મહેશ્વરઃ ।
તસ્માદાકાશમુત્પન્નમાકાશાદ્વાયુસમ્ભવઃ ॥ ૬॥

વાયોસ્તેજસ્તતશ્ચાપસ્તતઃ પૃથ્વીસમુદ્ભવઃ ।
એતાનિ પઞ્ચતત્ત્વાનિ વિસ્તીર્ણાનિ પઞ્ચધા ॥ ૭॥

તેભ્યો બ્રહ્માણ્ડમુત્પન્નં તૈરેવ પરિવર્તતે ।
વિલીયતે ચ તત્રૈવ તત્રૈવ રમતે પુનઃ ॥ ૮॥

પઞ્ચતત્ત્વમયે દેહે પઞ્ચતત્ત્વાનિ સુન્દરિ ।
સૂક્ષ્મરૂપેણ વર્તન્તે જ્ઞાયન્તે તત્ત્વયોગિભિઃ ॥ ૯॥

અથ સ્વરજ્ઞાનપ્રશંસા ।
અથ સ્વરં પ્રવક્ષ્યામિ શરીરસ્થસ્વરોદયમ્ ।
હંસચારસ્વરૂપેણ ભવેજ્જ્ઞાનં ત્રિકાલજમ્ ॥ ૧૦॥

ગુહ્યાદ્ગુહ્યતરં સારમુપકારપ્રકાશનમ્ ।
ઇદં સ્વરોદયં જ્ઞાનં જ્ઞાનાનાં મસ્તકે મણિઃ ॥ ૧૧॥

સૂક્ષ્માત્સૂક્ષ્મતરં જ્ઞાનં સુબોધં સત્યપ્રત્યયમ્ ।
આશ્ચર્યં નાસ્તિકે લોકે આધારં ત્વાસ્તિકે જને ॥ ૧૨॥

અથ શિષ્યલક્ષણમ્ ।
શાન્તે શુદ્ધે સદાચારે ગુરૂભક્ત્યૈકમાનસે ।
દૃઢચિત્તે કૃતજ્ઞે ચ દેયં ચૈવ સ્વરોદયમ્ ॥ ૧૩॥

દુષ્ટે ચ દુર્જને ક્રુદ્ધે નાસ્તિકે ગુરુતલ્પગે ।
હીનસત્ત્વે દુરાચારે સ્વરજ્ઞાનં ન દીયતે ॥ ૧૪॥

અથ સ્વરપ્રશંસા ।
શ઼ૃણુ ત્વં કથિતં દેવિ દેહસ્થં જ્ઞાનમુત્તમમ્ ।
યેન વિજ્ઞાનમાત્રેણ સર્વજ્ઞત્વં પ્રણીયતે ॥ ૧૫॥

સ્વરે વેદાશ્ચ શાસ્ત્રાણિ સ્વરે ગાન્ધર્વમુત્તમમ્ ।
સ્વરે ચ સર્વત્રૈલોક્યં સ્વરમાત્મસ્વરૂપકમ્ ॥ ૧૬॥

સ્વરહીનશ્ચ દૈવજ્ઞો નાથહીનં યથા ગૃહમ્ ।
શાસ્ત્રહીનં યથા વક્ત્રં શિરોહીનં ચ યદ્વપુઃ ॥ ૧૭॥

નાડીભેદં તથા પ્રાણતત્ત્વભેદં તથૈવ ચ ।
સુષુમ્નામિશ્રભેદં ચ યો જાનાતિ સ મુક્તિગઃ ॥ ૧૮॥

સાકારે વા નિરાકારે શુભં વાયુબલાત્કૃતમ્ ।
કથયન્તિ શુભં કેચિત્સ્વરજ્ઞાને વરાનને ॥ ૧૯॥

બ્રહ્માણ્ડખણ્ડપિણ્ડાદ્યાઃ સ્વરેણૈવ હિ નિર્મિતાઃ ।
સૃષ્ટિસંહારકર્ત્તા ચ સ્વરસાક્ષાન્મહેશ્વરઃ ॥ ૨૦॥

સ્વરજ્ઞાનાત્પરં ગુહ્મં સ્વરજ્ઞાનાત્પરં ધનમ્ ।
સ્વરજ્ઞાનત્પરં જ્ઞાનં નવા દૃષ્ટં નવા શ્રુતમ્ ॥ ૨૧॥

શત્રું હન્યાત્ સ્વબલે તથા મિત્રસમાગમઃ ।
લક્ષ્મીપ્રાપ્તિઃ સ્વરબલે કીર્તિઃ સ્વરબલે સુખમ્ ॥ ૨૨॥

કન્યાપ્રાપ્તિ સ્વરબલે સ્વરતો રાજદર્શનમ્ ।
સ્વરેણ દેવતાસિદ્ધિઃ સ્વરેણ ક્ષિતિપો વશઃ ॥ ૨૩॥

સ્વરેણ ગમ્યતે દેશો ભોજ્યં સ્વરબલે તથા ।
લઘુદીર્ઘં સ્વરબલે મલં ચૈવ નિવારયેત્ ॥ ૨૪॥

સર્વશાસ્ત્રપુરાણાદિ સ્મૃતિવેદાઙ્ગપૂર્વકમ્ ।
સ્વરજ્ઞાનાત્પરં તત્ત્વં નાસ્તિ કિઞ્ચિદ્વરાનને ॥ ૨૫॥

નામરૂપાદિકાઃ સર્વે મિથ્યા સર્વેષુ વિભ્રમઃ ।
અજ્ઞાનમોહિતા મૂઢા યાવત્તત્ત્વં ન વિદ્યતે ॥ ૨૬॥

ઇદં સ્વરોદયં શાસ્ત્રં સર્વશાસ્ત્રોત્તમોત્તમમ્ ।
આત્મઘટપ્રકાશાર્થં પ્રદીપકલિકોપમમ્ ॥ ૨૭॥

યસ્મૈ કસ્મૈ પરસ્મૈ વા ન પ્રોક્તં પ્રશ્નહેતવે ।
તસ્માદેતત્સ્વયં જ્ઞેયમાત્મનોવાઽઽત્મનાત્મનિ ॥ ૨૮॥

ન તિથિર્ન ચ નક્ષત્રં ન વારો ગ્રહદેવતાઃ ।
ન ચ વિષ્ટિર્વ્યતીપાતો વૈધૃત્યાદ્યાસ્તથૈવ ચ ॥ ૨૯॥

કુયોગો નાસ્ત્યતો દેવિ ભવિતા વા કદાચન ।
પ્રાપ્તે સ્વરબલે શુદ્ધે સર્વમેવ શુભં ફલમ્ ॥ ૩૦॥

અથ નાડીનિર્ણયઃ ।

દેહમધ્યે સ્થિતા નાડ્યો બહુરૂપાઃ સુવિસ્તરાત્ ।
જ્ઞાતવ્યાશ્ચ બુધૈર્નિત્યં સ્વદેહજ્ઞાનહેતવઃ ॥ ૩૧॥

નાભિસ્થાનગકન્દોર્ધ્વમઙ્કુરાદેવ નિર્ગતાઃ ।
દ્વિસપ્તતિસહસ્રાણિ દેહમધ્યે વ્યવસ્થિતાઃ ॥ ૩૨॥

નાડીસ્થા કુણ્ડલીશક્તિર્ભુજઙ્ગાકારશાયિની ।
તતો દશોર્ધ્વગાનાડ્યોદશૈવાધઃ પ્રતિષ્ઠિતાઃ ॥ ૩૩॥

અથ નાડિસ્થિત્યાદિકથનમ્ ।

દ્વે દ્વે તિર્યગ્ગતે નાડ્યશ્ચતુર્વિંશતિ સઙ્ખ્યયા ।
પ્રધાના દશનાડ્યસ્તુ દશવાયુપ્રવાહિકાઃ ॥ ૩૪॥

તિર્યગૂર્ધ્વાસ્તથા નાડ્યો વાયુદેહસમન્વિતાઃ ।
ચક્રવત્સંસ્થિતા દેહે સર્વાઃ પ્રાણસમાશ્રિતાઃ ॥ ૩૫॥

અથ નાડિભેદકથનમ્ ।
તાસાં મધ્યે દશ શ્રેષ્ઠા દશાનાં તિસ્ર ઉત્તમાઃ ।
ઇડા ચ પિઙ્ગલા ચૈવ સષુમ્ના ચ તૃતીયકા ॥ ૩૬॥

ગાન્ધારી હસ્તિજિહ્વા ચ પૂષા ચૈવ યશસ્વિની ।
અલમ્બુષા કુહૂશ્ચૈવ શઙ્ખિની દશમી તથા ॥ ૩૭॥

અથ નાડિસ્થાનકથનમ્ ।
ઇડા વામે સ્થિતા ભાગે પિઙ્ગલા દક્ષિણે સ્મૃતા ।
સુષુમ્ના મધ્યદેશે તુ ગાન્ધારી વામચક્ષુષિ ॥ ૩૮॥

દક્ષિણે હસ્તિજિહ્વા ચ પૂષા કર્ણે ચ દક્ષિણે ।
યશસ્વિની વામકર્ણે આનને ચાપ્યલમ્બુષા ॥ ૩૯॥

કુહૂશ્ચ લિઙ્ગદેશે તુ મૂલસ્થાને તુ શઙ્ખિની ।
એવં દ્વારં સમાશ્રિત્ય તિષ્ઠન્તિ દશનાડિકાઃ ॥ ૪૦॥

ઇડા પિઙ્ગલા (પિઙ્ગલેડા)સુષુમ્ના ચ પ્રાણમાર્ગે સમાશ્રિતાઃ ।
એતા હિ દશનાડ્યસ્તુ દેહમધ્યે વ્યવસ્થિતાઃ ॥ ૪૧॥

અથ વાયુસ્થાનભેદકથનમ્ ।
નામાનિ નાડિકાનાં વાતાનાં તુ વદામ્યહમ્ ।
પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ॥ ૪૨॥

નાગઃ કૂર્મોઽથ કૃકલો દેવદત્તો ધનઞ્જયઃ ।
હૃદિ પ્રાણો વસેન્નિત્યમપાનો ગુદમણ્ડલે ॥ ૪૩॥

સમાનો નાભિદેશે તુ ઉદાનઃ કણ્ઠમધ્યગઃ ।
વ્યાનો વ્યાપિ શરીરેષુ પ્રધાનાઃ દશવાયવઃ ॥ ૪૪॥

પ્રાણાદ્યાઃ પઞ્ચવિખ્યાતાઃ નાગાદ્યાઃ પઞ્ચવાયવઃ ।
તેષામપિ પઞ્ચનાં સ્થાનાનિ ચ વદામ્યહમ્ ॥ ૪૫॥

ઉદ્ગારે નાગ આખ્યાતઃ કૂર્મોન્મીલને સ્મૃતઃ ।

કૃકલઃ ક્ષુતકૃજ્જ્ઞેયો દેવદત્તો વિજૃમ્ભણે ॥ ૪૬॥

ન જહાતિ મૃતં વાપિસર્વવ્યાપિ ધનઞ્જયઃ ।
એતે નાડીષુ સર્વાસુ ભ્રમન્તે જીવરૂપિણઃ ॥ ૪૭॥

પ્રકટં પ્રાણસઞ્ચારં લક્ષ્યેદ્દેહમધ્યતઃ ।
ઇડાપિઙ્ગલાસુષુમ્નાભિર્નાડીભિસ્તિસૃભિબુધઃ ॥ ૪૮॥

ઇડા વામે ચ વિજ્ઞેયા પિઙ્ગલા દક્ષિણે સ્મૃતા ।
ઇડાનાડીસ્થિતા વામા તતો વ્યસ્તા ચ પિઙ્ગલા ॥ ૪૯॥

અથ નાડીષુ સૂર્યચન્દ્રાદિસ્થિતિકાર્યકથનમ્ ।
ઇડાયાં તુ સ્થિતશ્ચન્દ્રઃ પિઙ્ગલાયાં ચ ભાસ્કરઃ ।
સુષુમ્ના શમ્ભુરૂપેણ શમ્ભુર્હંસસ્વરૂપતઃ ॥ ૫૦॥

હકારો નિર્ગમે પ્રોક્ત સકારેણ પ્રવેશનમ્ ।
હકારઃ શિવરૂપેણ સકારઃ શક્તિરુચ્યતે ॥ ૫૧॥

શક્તિરૂપઃ સ્થિતશ્ચન્દ્રો વામનાડીપ્રવાહકઃ ।
દક્ષનાડીપ્રવાહશ્ચ શમ્ભુરૂપો દિવાકરઃ ॥ ૫૨॥

શ્વાસે સકારસંસ્થે તુ યદ્દાનં દીયતે બુધૈઃ ।
તદ્દાનં જીવલોકેઽસ્મિન્ કોટિકોટિગુણં ભવેત્ ॥ ૫૩॥

અનેન લક્ષયેદ્યોગી ચૈકચિત્તઃ સમાહિતઃ ।
સર્વમેવ વિજાનીયાન્માર્ગે વૈ ચન્દ્રસૂર્યયોઃ ॥ ૫૪॥

ધ્યાયેત્તત્ત્વં સ્થિરે જીવે અસ્થિરે ન કદાચન ।
ઇષ્ટસિદ્ધિર્ભવેત્તસ્ય મહાલાભો જયસ્તથા ॥ ૫૫॥

ચન્દ્રસૂર્યસમભ્યાસં યે કુર્વન્તિ સદા નરાઃ ।
અતીતાનાગતજ્ઞાનં તેષાં હસ્તગતં ભવેત્ ॥ ૫૬॥

વામે ચાઽમૃતરૂપા સ્યાજ્જગદાપ્યાયનં પરમ્ ।
દક્ષિણે ચરભાગેન જગદુત્પાદયેત્સદા ॥ ૫૭॥

અથ શુભાશુભનાડિકથનમ્ ।
મધ્યમા ભવતિ ક્રૂરા દુષ્ટા સર્વત્ર કર્મસુ ।
સર્વત્ર શુભકાર્યેષુ વામા ભવતિ સિદ્ધિદા ॥ ૫૮॥

નિર્ગમે તુ શુભા વામા પ્રવેશે દક્ષિણા શુભા ।

ચન્દ્રઃ સમસ્તુ વિજ્ઞેયો રવિસ્તુ વિષમઃ સદા ॥ ૫૯॥

ચન્દ્રઃ સ્ત્રી પુરુષઃ સૂર્યશ્ચન્દ્રો ગૌરોઽસિતો રવિઃ ।
ચન્દ્રનાડીપ્રવાહેણ સૌમ્યકાર્યાણિ કારયેત્ ॥ ૬૦॥

અથ સ્વરોદયસમયકથનમ્ ।
સૂર્યનાડીપ્રવાહેણ રૌદ્રકર્માણિ કારયેત્ ।
સુષુમ્નાયાઃ પ્રવાહેણ ભુક્તિમુક્તિ ફલાનિ ચ ॥ ૬૧॥

આદૌ ચન્દ્રઃ સિતે પક્ષે ભાસ્કરો હિ સિતેતરે ।
પ્રતિપત્તો દિનાન્યાહુસ્ત્રીણિ ત્રીણિ કૃતોદયૌ ॥ ૬૨॥

સાર્ધદ્વિઘટિકે જ્ઞેયઃ શુક્લે કૃષ્ણે શશી રવિઃ ।
વહત્યૈકદિનેનૈવ યથા ષષ્ટિઘટીઃ ક્રમાત્ ॥ ૬૩॥

વહેયુસ્તદ્ઘટીમધ્યે પઞ્ચતત્ત્વાનિ નિર્દિશયેત્ ।
પ્રતિપત્તો દિનાન્યાહુર્વિપરીતે વિવર્જયેત્ ॥ ૬૪॥

શુક્લપક્ષે ભવેદ્વામા કૃષ્ણપક્ષે ચ દક્ષિણા ।
જાનીયાત્પ્રતિપત્પૂર્વં યોગી તદ્ગતમાનસઃ ॥ ૬૫॥

શશાઙ્કં વારયેદ્રાત્રૌ દિવા વારય ભાસ્કરમ્ ।
ઇત્યાભ્યાસરતો નિત્યં સ યોગી નાત્ર સંશયઃ ॥ ૬૬॥

સૂર્યેણ બધ્યતે સૂર્યશ્ચન્દ્રશ્ચન્દ્રેણ બધ્યતે ।
યો જાનાતિ ક્રિયામેતાં ત્રૈલોક્યં વશગં ક્ષણાત્ ॥ ૬૭॥

ઉદયં ચન્દ્રમાર્ગેણ સૂર્યેણાસ્તમનં યદિ ।
તદા તે ગુણસઙ્ઘાતા વિપરીતં વિવર્જયેત્ ॥ ૬૮॥

ગુરુશુક્રબુધેન્દૂનાં વાસરે વામનાડિકા ।
સિદ્ધિદા સર્વકાર્યેષુ શુક્લપક્ષે વિશેષતઃ ॥ ૬૯॥

અર્કાઙ્ગારકસૌરીણાં વાસરે દક્ષનાડિકા ।
સ્મર્ત્તવ્યા ચરકાર્યેષુ કૃષ્ણપક્ષે વિશેષતઃ ॥ ૭૦॥

તત્ત્વોદયક્રમકથનમ્ ।
પ્રથમં વહતે વાયુર્દ્વિતીયં ચ તથાનલઃ ।
તૃતીયં વહતે ભૂમિશ્ચતુર્થં વરુણો વહેત્ ॥ ૭૧॥

સાર્દ્ધદ્વિઘટિકે પઞ્ચક્રમેણૈવોદયન્તિ ચ ।

ક્રમાદેકૈકનાડ્યાં ચ તત્ત્વાનાં પૃથગુદ્ભવઃ ॥ ૭૨॥

અહોરાત્રસ્ય મધ્યે તુ જ્ઞેયા દ્વાદશસઙ્ક્રમાઃ ।
વૃષકર્કટકન્યાલિમૃગમીના નિશાકરે ॥ ૭૩॥

મેષસિંહૌ ચ કુમ્ભશ્ચ તુલા ચ મિથુનં ધનુમ્ ।
ઉદયે દક્ષિણે જ્ઞેયઃ શુભાશુભવિનિર્ણયઃ ॥ ૭૪॥

તિષ્ઠેત્પૂર્વોત્તરે ચન્દ્રો ભાનુઃ પશ્ચિમદક્ષિણે ।
દક્ષનાડ્યાઃ પ્રસારે તુ ન ગચ્છેદ્યામ્યપશ્ચિમે ॥ ૭૫॥

વમાચારપ્રવાહે તુ ન ગચ્છેત્પૂર્વોત્તરે ।
પરિપન્થિભયં તસ્ય ગતોઽસૌ ન નિવર્તતે ॥ ૭૬॥

તત્ર તસ્માન્ન ગન્તવ્યં બુધૈઃ સર્વહિતૈષિભિઃ ।
તદા તત્ર તુ સંયાતે મૃત્યુરેવ ન સંશયઃ ॥ ૭૭॥

શુક્લપક્ષે દ્વિતીયાયામર્કે વહતિ ચન્દ્રમાઃ ।
દૃશ્યતે લાભદઃ પુસાં સૌમ્યે સૌખ્યં પ્રજાયતે ॥ ૭૮॥

સૂર્યોદયે યદા સૂર્યશ્ચન્દ્રશ્ચન્દ્રોદયે ભવેત્ ।
સિધ્યન્તિ સર્વકાર્યાણિ દિવારાત્રિગતાન્યપિ ॥ ૭૯॥

ચન્દ્રકાલે યદા સૂર્યઃ સૂર્યશ્ચન્દ્રોદયે ભવેત્ ।
ઉદ્વેગઃ કલહો હાનિઃ શુભં સર્વં નિવારયેત્ ॥ ૮૦॥

સૂર્યસ્ય વાહે પ્રવદન્તિ વિજ્ઞાઃ જ્ઞાનં હ્યગમસ્ય તુ નિશ્ચયેન ।
શ્વાસેન યુક્તસ્ય તુ શીતરશ્મેઃ પ્રવાહકાલે ફલમન્યથા સ્યાત્ ॥ ૮૧॥

અથ વિપરીતલક્ષણમ્ ।
યદા પ્રત્યૂષકાલેન વિપરીતોદયો ભવેત્ ।
ચન્દ્રસ્થાને વહત્યર્કો રવિસ્થાને ચ ચન્દ્રમાઃ ॥ ૮૨॥

પ્રથમે મન ઉદ્વેગં ધનહાનિર્દ્વિતીયકે ।
તૃતીયે ગમનં પ્રોક્તમિષ્ટનાશં ચતુર્થકે ॥ ૮૩॥

પઞ્ચમે રાજ્યવિધ્વંસં ષષ્ઠે સર્વાર્થનાશનમ્ ।
સપ્તમે વ્યાધિદુઃખાનિ અષ્ટમે મૃત્યુમાદિશેત્ ॥ ૮૪॥

કાલત્રયે દિનાન્યષ્ટૌ વિપરીતં યદા વહેત્ ।
તદા દુષ્ટફલં પ્રોક્તં કિઞ્ચિન્યૂનં તુ શોભનમ ॥ ૮૫॥

પ્રાતર્મધ્યાહ્નયોશ્ચન્દ્રઃ સાંયકાલે દિવાકરઃ ।
તદા નિત્યં જયો લાભો વિપરીતં વિવર્જયેત્ ॥ ૮૬॥

અથ યાત્રાદિસ્વરફલકથનમ્ ।
વામે વા દક્ષિણે વાપિ યત્ર સઙ્ક્રમતે શિવઃ ।
કૃત્વા તત્પાદમાદૌ ચ યાત્રા ભવતિ સિદ્ધિદા ॥ ૮૭॥

ચન્દ્રઃ સમપદઃ કાર્યો રવિસ્તુ વિષમઃ સદા ।
પૂર્ણપાદં પુરસ્કૃત્ય યાત્રા ભવતિ સિદ્ધિદા ॥ ૮૮॥

યત્રાઙ્ગે વહતે વાયુસ્તદઙ્ગકરસત્તલાત્ ।
સુપ્તોત્થિતો મુખં સ્પૃષ્ટ્વા લભતે વાઞ્છિતં ફલમ્ ॥ ૮૯॥

પરદત્તે તથા ગ્રાહ્યે ગૃહન્નિર્ગમનેઽપિ ચ ।
યદઙ્ગે વહતે નાડી ગ્રાહયં તેન કરાઙ્ઘ્રિણા ॥ ૯૦॥

ન હાનિઃ કલહો નૈવ કણ્ટકૈર્નાપિ ભિદ્યતે ।
નિવર્તતે સુખી ચૈવ સર્વોપદ્રવવર્જિતઃ ॥ ૯૧॥

ગુરુબન્ધુનૃપામાત્યેષ્વન્યેષુ શુભદાયિની ।
પૂર્ણાઙ્ગૈઃ ખલુ કર્ત્તવ્યા કાર્યસિદ્ધિર્મનઃસ્થિતા ॥ ૯૨॥

અગ્નિચૌર્યાધર્મધર્ષા અન્યેષાં વાદિનિગ્રહઃ ।
કર્ત્તવ્યાઃ ખલુ રિક્તાઙ્ગૈર્જયલાભસુખાર્થિભિઃ ॥ ૯૩॥

દૂરદેશે વિધાતવ્યં ગમનં તુ હિમદ્યુતૌ ।
અભ્યર્ણદેશે દીપ્તે તુ કારણાવિતિ કેચન ॥ ૯૪॥

યત્કિઞ્ચિત્પૂર્વમુદ્દિષ્ટં લાભાદિ સમરાગમઃ ।
તત્સર્વં પૂર્ણનાડીષુ જાયતે નિર્વિકલ્પકમ્ ॥ ૯૫॥

શૂન્યનાડ્યાં વિપર્યસ્તં યત્પૂર્વં પ્રતિપાદિતમ્ ।
જાયતે નાન્યથા ચૈવ યથા સર્વજ્ઞભાષિતમ્ ॥ ૯૬॥

વ્યવહારે ખલોચ્ચાટે દ્વેષિવિદ્યાદિવઞ્ચકે ।
કુપિતસ્વામિચૌર્યાદ્યે પૂર્ણસ્થાઃ સ્યુર્ભયઙ્કરાઃ ॥ ૯૭॥

દૂરાધ્વનિ શુભશ્ચન્દ્રો નિર્વિઘ્નોઽભીષ્ટસિદ્ધિદઃ ।
પ્રવેશકાર્યે હેતૌ ચ સૂર્યનાડીપ્રશસ્યતે ॥ ૯૮॥

અયોગ્યે યોગ્યતા નાડ્યો યોગ્યસ્થાનેપ્યયોગ્યતા ।
કાર્યાનુબન્ધનો જીવો યથા રુદ્રસ્તથાચરેત્ । ૯૯ ॥

ચન્દ્રચારે વિષહતે સૂર્યો બલિવશં નયેત્ ।
સુષુમ્નાયાં ભવેન્મોક્ષ એકો દેવસ્ત્રિધાસ્થિતઃ ॥ ૧૦૦ ॥

શુભાન્યશુભકાર્યાણિ ક્રિયન્તેઽહર્નિશં યદા ।
તત્તત્કાર્યાનુરોધેન કાર્યં નાડીપ્રચાલનમ્ ॥ ૧૦૧ ॥

અથ નાડીભેદઃ ।
ઇડાકર્ત્તવ્યકૃત્યનિરૂપણમ્ ।
સ્થિરકર્મણ્યલઙ્કારે દૂરાધ્વગમને તથા ।
આશ્રમે ધર્મપ્રાસાદે વસ્તૂનાં સઙ્ગ્રહેઽપિ ચ ॥ ૧૦૨ ॥

વાપીકૂપતડાગાનાં પ્રતિષ્ઠાસ્તમ્ભદેવયોઃ ।
યાત્રા દાને વિવાહે ચ વસ્ત્રાલઙ્કારભૂષણે ॥ ૧૦૩ ॥

શાન્તિકે પૌષ્ટિકે ચૈવ દિવ્યૌષધિરસાયને ।
સ્વસ્વામીદર્શને મિત્રે વાણિજ્યે કણસઙ્ગ્રહે ॥ ૧૦૪ ॥

ગૃહપ્રવેશે સેવાયાં કૃષૌ ચ બીજવાપને ।
શુભકર્મણિ સન્ધૌ ચ નિર્ગમે ચ શુભઃ શશી ॥ ૧૦૫ ॥

વિદ્યારમ્ભાદિકાર્યેષુ બાન્ધવાનાં ચ દર્શને ।
જન્મમોક્ષે ચ ધર્મે ચ દીક્ષાયાં મન્ત્રસાધને ॥ ૧૦૬ ॥

કાલવિજ્ઞાનસૂત્રે તુ ચતુષ્પાદગૃહાગમે ।
કાલવ્યાધિચિકિત્સાયાં સ્વામીસમ્બોધને તથા ॥ ૧૦૭ ॥

ગજાશ્વરોહણે ધન્વિ ગજાશ્વાનાં ચ બન્ધને ।
પરોપકારણે ચૈવ નિધીનાં સ્થાપને તથા ॥ ૧૦૮ ॥

ગીતવાદ્યાદિનૃત્યાદૌ નૃત્યશાસ્ત્રવિચારણે ।
પુરગ્રામનિવેશે ચ તિલકક્ષેત્રધારણે ॥ ૧૦૯ ॥

આર્તિશોકવિષાદે ચ જ્વરિતે મૂર્છિતેઽપિ વા ।
સ્વજનસ્વામીસમ્બન્ધે અન્નાદૌ દારુસઙ્ગ્રહે ॥ ૧૧૦ ॥

સ્ત્રીણાં દન્તાદિભૂષાયાં વૃષ્ટે રાગમને તથા ।
ગુરુપૂજાવિષાદીનાં ચાલને ચ વરાનને ॥ ૧૧૧ ॥

ઇડાયાં સિદ્ધદં પ્રોક્તં યોગાભ્યાસાદિકર્મ ચ ।
તત્રાપિ વર્જયેદ્વાયું તેજ આકાશમેવ ચ ॥ ૧૧૨॥

સર્વકાર્યાણિ સિદ્ધ્યન્તિ દિવારાત્રિગતાન્યપિ ।
સર્વેષુ શુભકાર્યેષુ ચન્દ્રચારઃ પ્રશસ્યતે ॥ ૧૧૩॥

પિઙ્ગલાકર્ત્તવ્યકૃત્યનિરૂપણમ્ ।
કઠિનક્રૂરવિદ્યાનાં પઠને પાઠને તથા ।
સ્ત્રીસઙ્ગે વેશ્યાગમને મહાનૌકાધિરોહણે ॥ ૧૧૪॥

ભ્રષ્ટકાર્યે સુરાપાને વીરમન્ત્રાદ્યુપાસને ।
વિહ્વલે ધ્વંસદેશાદૌ વિષદાને ચ વૈરિણામ્ ॥ ૧૧૫॥

શાસ્ત્રાભ્યાસે ચ ગમને મૃગયા પશુવિક્રયે ।
ઇષ્ટિકાકાષ્ઠપાષાણરત્નઘર્ષણદારણે ॥ ૧૧૬॥

ગત્યભ્યાસે યન્ત્રતન્ત્રે દુર્ગપર્વતારોહણે ।
દ્યૂતે ચૌર્યે ગજાશ્વાદિરથસાધનવાહને ॥ ૧૧૭॥

વ્યાયામે મારણોચ્ચાટે ષટ્કર્માદિસાધને ।
યક્ષિણીયક્ષવેતાલવિષભૂતાદિનિગ્રહે ॥ ૧૧૮॥

ખરોષ્ટ્રમહીષાદીનાં ગજાશ્વારોહણે તથા ।
નદીજલૌઘતરણે ભેષજે લિપિલેખને ॥ ૧૧૯॥

મારણે મોહને સ્તમ્ભે વિદ્વેષોચ્ચાટને વશે ।
પ્રેરણે કર્ષણે ક્ષોભે દાને ચ ક્રયવિક્રયે ॥ ૧૨૦॥

પ્રેતાકર્ષણવિદ્વેષશત્રુનિગ્રહણેઽપિ ચ ।
ખડ્ગહસ્તે વૈરિયુદ્ધે ભોગે વા રાજદર્શને ।
ભોજ્યે સ્નાને વ્યવહારે દીપ્તકાર્યે રવિઃ શુભઃ ॥ ૧૨૧॥

ભુક્તમાર્ગેણ મન્દાગ્નૌ સ્ત્રીણાં વશ્યાદિકર્મણિ ।
શયનં સૂર્યવાહેન કર્તવ્યં સર્વદા બુધૈઃ ॥ ૧૨૨॥

ક્રૂરાણિ સર્વકર્માણિ ચરાણિ વિવિધાનિ ચ ।
તાનિ સિદ્ધ્યન્તિ સૂર્યેણ નાત્ર કાર્યા વિચારણા ॥ ૧૨૩॥

સુષુમ્નાકર્ત્તવ્યકૃત્યનિરૂપણમ્ ।
ક્ષણં વામે ક્ષણં દક્ષે યદા વહતિ મારુતઃ ।

સુષુમ્ના સા ચ વિજ્ઞેયા સર્વકાર્યહરા સ્મૃતા ॥ ૧૨૪॥

તસ્યાં નાડ્યાં સ્થિતો વહ્નિર્જ્વલતે કાલરૂપકઃ ।
વિષવત્તં વિજાનીયાત્ સર્વકાર્યવિનાશનમ્ ॥ ૧૨૫॥

યદાઽનુક્રમમુલ્લઙ્ઘ્ય યસ્ય નાડીદ્વયં વહેત્ ।
તદા તસ્ય વિજાનીયાદશુભં નાત્ર સંશયઃ ॥ ૧૨૬॥

ક્ષણં વામે ક્ષણં દક્ષે વિષમં ભાવમાદિશેત્ ।
વિપરીતં ફલં જ્ઞેયં જ્ઞાતવ્યં ચ વરાનને ॥ ૧૨૭॥

ઉભયોરેવ સઞ્ચાર વિષવન્તં વિદુર્બુધાઃ ।
ન કુર્યાત્ક્રૂરસૌમ્યાનિ તત્સર્વં વિફલં ભવેત્ ॥ ૧૨૮॥

જીવિતે મરણે પ્રશ્ને લાભાલાભે જયાજયે ।
વિષમે વિપરીતે ચ સંસ્મરેજ્જગદીશ્વરમ્ ॥ ૧૨૯॥

ઈશ્વરે ચિન્તિતે કાર્યં યોગાભ્યાસાદિકર્મ ચ ।
અન્યતત્ર ન કર્ત્તવ્યં જયલાભસુખૈષિભિઃ ॥ ૧૩૦॥

સૂર્યેણ વહમાનાયાં સુષુમ્નાયાં મુહુર્મુહુઃ ।
શાપં દદ્યાદ્વરં દદ્યાત્સર્વથૈવ તદન્યથા ॥ ૧૩૧॥

નાડીસઙ્ક્રમણે કાલે તત્ત્વસઙ્ગમનેઽપિ ચ ।
શુભં કિઞ્ચિન્ન કર્તવ્યં પુણ્યદાનાનિ કોટિધા ॥ ૧૩૨॥

વિષમસ્યોદયો યત્ર મનસાઽપિ ચિન્તયેત્ ।
યાત્રા હાનિકરો તસ્ય મૃત્યુઃ ક્લેશો ન સંશયઃ ॥ ૧૩૩॥

પુરો વામોર્ધ્વતશ્ચન્દ્રો દક્ષાધઃ પૃષ્ઠતો રવિઃ ।
પૂર્ણા રિક્તાવિવેકોઽયં જ્ઞાતવ્યો દૈશિકૈઃ સદા ॥ ૧૩૪॥

ઊર્ધ્વવામાગ્રતો દૂતો જ્ઞેયો વામે પથિ સ્થિતઃ ।
પૃષ્ઠે દક્ષે તથાઽધસ્તાત્સૂર્યવાહાગતઃ શુભઃ ॥ ૧૩૫॥

અનાદિર્વિષમઃ સન્ધિર્નિરાહારો નિરાકુલઃ ।
પરે સૂક્ષ્મે વિલીયતે સા સન્ધ્યા સદ્ભિરુચ્યતે ॥ ૧૩૬॥

ન વેદં વેદ ઇત્યાહુર્વેદો વેદો ન વિદ્યતે ।
પરમાત્મા વેદ્યતે યેન સ વેદો વેદ ઉચ્યતે ॥ ૧૩૭॥

ન સન્ધ્યા સન્ધિરિત્યાહુઃ સન્ધ્યા સન્ધિર્નિગદ્યતે ।
વિષમઃ સન્ધિગઃ પ્રાણ સ સન્ધિઃ સન્ધિરુચ્યતે ॥ ૧૩૮॥

અથ તત્ત્વવર્ણનમ્ ।

શ્રીદેવ્યુવાચ ।
દેવ દેવ મહાદેવ સર્વસંસારતારક ।
સ્થિતં ત્વદીયહૃદયે રહસ્યં વદ મે પ્રભો ॥ ૧૩૯॥

ઈશ્વર ઉવાચ ।
સ્વરજ્ઞાનરહસ્યાત્તુ ન કાચિચ્ચેષ્ટદેવતા ।
સ્વરજ્ઞાનરતો યોગી સ યોગી પરમો મતઃ ॥ ૧૪૦॥

પઞ્ચતત્ત્વાદ્ભવેત્સૃષ્ટિસ્તત્ત્વે તત્ત્વં પ્રલીયતે ।
પઞ્ચતત્ત્વં પરં તત્ત્વં તત્ત્વાતીતં નિરઞ્જનમ્ ॥ ૧૪૧॥

તત્ત્વાનાં નામવિજ્ઞેયં સિદ્ધયોગેન યોગિનામ્ ।
ભૂતાનાં દુષ્ટચિહ્નાનિ જાનાતીહ સ્વરોત્તમઃ ॥ ૧૪૨॥

પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશમેવ ચ ।
પઞ્ચભૂતાત્મકં વિશ્વં યો જાનાતિ સ પૂજિતઃ ॥ ૧૪૩॥

સર્વલોકસ્થજીવાનાં ન દેહો ભિન્નતત્ત્વકઃ ।
ભૂર્લોકાત્સત્યપર્યન્તં નાડીભેદઃ પૃથક્ પૃથક્ ॥ ૧૪૪॥

વામે વા દક્ષિણે વાઽપિ ઉદયાઃ પઞ્ચ કીર્ત્તિતાઃ ।
અષ્ટધા તત્ત્વવિજ્ઞાનં શ્રૃણુ વક્ષ્યામિ સુન્દરિ ॥ ૧૪૫॥

પ્રથમે તત્ત્વસઙ્ખ્યાનં દ્વિતીયે શ્વાસસન્ધયઃ ।
તૃતીયે સ્વરચિહ્નાનિ ચતુર્થે સ્થાનમેવ ચઃ ॥ ૧૪૬॥

પઞ્ચમે તસ્ય વર્ણાશ્ચ ષષ્ઠે તુ પ્રાણ એવ ચ ।
સપ્તમે સ્વાદસંયુક્તા અષ્ટમે ગતિલક્ષણમ્ ॥ ૧૪૭॥

એવમષ્ટવિધં પ્રાણં વિષુવન્તં ચરાચરમ્ ।
સ્વરાત્પરતરં દેવિ નાન્યથા ત્વમ્બુજેક્ષણે ॥ ૧૪૮॥

નિરીક્ષિતવ્યં યત્નેન સદા પ્રત્યૂષકાલતઃ ।
કાલસ્ય વઞ્ચાનાર્થાય કર્મ કુર્વન્તિ યોગિનઃ ॥ ૧૪૯॥

અથ ષણ્મુખીમુદ્રાકથનમ્ ।

શ્રુત્યોરઙ્ગુષ્ઠકે મધ્યાઙ્ગુલ્યૌ નાસાપુટદ્વયે ।
વદનપ્રાન્તકે ચાન્યાઙ્ગુલીર્દદ્યાચ્ચ નેત્રયોઃ ॥ ૧૫૦॥

અસ્યાન્તસ્તુ પૃથિવ્યાદિ તત્ત્વજ્ઞાનં ભવેત્ક્રમાત્ ।
પીતશ્વેતારુણશ્યામૈર્બિન્દુભિર્નિરુપાધિકમ્ ॥ ૧૫૧॥

દર્પણેન સમાલોક્ય તત્ર શ્વાસે વિનિક્ષિપેત્ ।
આકારૈસ્તુ વિજાનીયાત્તત્ત્વભેદં વિચક્ષણઃ ॥ ૧૫૨॥

અથ તત્ત્વાકારેત્યાદિનિર્ણયકથનમ્ ।

ચતુરસ્રં ચાર્ધચન્દ્રં ત્રિકોણં વર્તુલં સ્મૃતમ્ ।
બિન્દુભિસ્તુ નભો (મનો)જ્ઞેયમાકારૈસ્તત્ત્વલક્ષણમ્ ॥ ૧૫૩॥

મધ્યે પૃથ્વી હ્યધશ્ચાપશ્ચોર્ધ્વં વહતિ ચાનલઃ ।
તિર્યગ્વાયુપ્રવાહશ્ચ નભો વહતિ સઙ્ક્રમે ॥ ૧૫૪॥

આપઃ શ્વેતાઃ ક્ષિતિઃ પીતા રક્તવર્ણો હુતાશનઃ ।
મારુતો નીલજીમૂત આકાશઃ સર્વવર્ણકઃ ॥ ૧૫૫॥

સ્કન્ધદ્વયે સ્થિતો વહ્નિર્નાભિમૂલે પ્રભઞ્જનઃ ।
જાનુદેશે ક્ષિતિસ્તોયં પાદાન્તે મસ્તકે નભઃ ॥ ૧૫૬॥

માહેયં મધુરં સ્વાદે કાષાયં જલમેવ ચ ।
તીક્ષ્ણં તેજસ્સમીરોઽમ્લં આકાશં કટુકં તથા ॥ ૧૫૭॥

અષ્ટઙ્ગુલં વહેદ્વાયુરનલશ્ચતુરઙ્ગુલમ્ ।
દ્વાદશાઙ્ગુલમાહેયં વારુણં ષોડશાઙ્ગુલમ્ ॥ ૧૫૮॥

ઉર્ધ્વં મૃત્યુરધઃ શાન્તિસ્તિર્યગુચ્ચાટનં તથા ।
મધ્યે સ્તમ્ભં વિજાનીયાન્નભઃ સર્વત્ર મધ્યમમ્ ॥ ૧૫૯॥

અથ તત્ત્વસ્વરુપકર્તવ્યાદિકથનમ્ ।

પૃથિવ્યાં સ્થિરકર્માણિ ચરકર્માણિ વારુણે ।
તેજસિ ક્રૂરકર્માણિ મારણોચ્ચાટનેઽનિલે ॥ ૧૬૦॥

વ્યોમ્નિ કિઞ્ચિન્ન કર્ત્તવ્યમભ્યસેદ્યોગસેવનમ્ ।
શૂન્યતા સર્વકાર્યેષુ નાત્ર કાર્યા વિચારણા ॥ ૧૬૧॥

પૃથ્વીજલાભ્યાં સિદ્ધિઃ સ્યાન્મૃત્યુર્વહ્નૌ ક્ષયોઽનિલે ।
નભસો નિષ્ફલં સર્વં જ્ઞાતવ્યં તત્ત્વ વેદિભિઃ ॥ ૧૬૨॥

ચિરલાભઃ ક્ષિતૌ જ્ઞેયસ્તત્ક્ષણે તોયતત્ત્વતઃ ।
હાનિઃ સ્યાદ્વહ્નિવાતાભ્યાં નભસો નિષ્ફલં ભવેત્ ॥ ૧૬૩॥

પીતઃ શનૈર્મધ્યવાહી હનુર્યાવદ્ગુરુધ્વનિઃ ।
કવોષ્ણઃ પાર્થિવો વાયુઃ સ્થિરકાર્યપ્રસાધકઃ ॥ ૧૬૪॥

અધોવાહી ગુરુધ્વાનઃ શીઘ્રગઃ શીતલઃ સ્થિતઃ ।
યઃ ષોડશાઙ્ગુલો વાયુઃ સ આપઃ શુભકર્મકૃત ॥ ૧૬૫॥

આવર્તગશ્ચાત્યુષ્ણશ્ચ શોણાભશ્ચતુરઙ્ગુલઃ ।
ઉર્ધ્વવાહિ ચ યઃ ક્રૂરઃ કર્મકારી સ તેજસઃ ॥ ૧૬૬॥

ઉષ્ણઃ શીતઃ કૃષ્ણવર્ણસ્તિર્યગાન્યષ્ટકાઙ્ગુલઃ ।
વાયુઃ પવનસંજ્ઞસ્તુ ચરકર્મપ્રસાધકઃ ॥ ૧૬૭॥

યઃ સમીરઃ સમરસઃ સર્વતત્ત્વગુણાવહઃ ।
આમ્બરં તં વિજાનીયાદ્યોગિનાં યોગદાયકમ્ ॥ ૧૬૮॥

પીતવર્ણં ચતુષ્કોણં મધુરં મધ્યમાશ્રિતમ્ ।
ભોગદં પાર્થિવં તત્ત્વં પ્રવાહે દ્વાદશાઙ્ગુલમ્ ॥ ૧૬૯॥

શ્વેતમર્ધેન્દુસઙ્કાશં સ્વાદુકાષાયમાર્દ્રકમ્ ।
લાભકૃદ્વારુણં તત્ત્વં પ્રવાહે ષોડશાઙ્ગુલમ્ ॥ ૧૭૦॥

રક્તં ત્રિકોણં તીક્ષ્ણં ચ ઉર્ધ્વભાગપ્રવાહકમ્ ।
દીપ્તં ચ તૈજસં તત્ત્વં પ્રવાહે ચતુરઙ્ગુલમ્ ॥ ૧૭૧॥

નીલં ચ વર્તુલાકારં સ્વાદ્વામ્લં તિર્યગાશ્રિતમ્ ।
ચપલં મારુતં તત્ત્વં પ્રવાહેઽષ્ટાઙ્ગુલં સ્મૃતમ્ ॥ ૧૭૨॥

વર્ણાકારં સ્વાદવાહેષ્વવ્યક્તં સર્વગામિનમ્ ।
મોક્ષદં નભસં તત્ત્વં સર્વકાર્યેષુ નિષ્ફલમ્ ॥ ૧૭૩॥

અથ શુભાશુભતત્ત્વવિચારઃ ।

પૃથ્વીજલે શુભે તત્ત્વે તેજોમિશ્રં ફલોદયમ્ ।
હાનિમૃત્યુકરૌ પુંસામશુભૌ વ્યોમમારુતૌ ॥ ૧૭૪॥

આપૂર્વપશ્ચિમે પૃથ્વીતેજશ્ચ દક્ષિણે તથા ।
વાયુશ્ચોત્તરદિગ્જ્ઞેયો મધ્યે કોણગતં નભઃ ॥ ૧૭૫॥

ચન્દ્રે પૃથ્વીજલે સ્યાતાં સૂર્યેઽગ્નિર્વા યદા ભવેત્ ।

તદા સિદ્ધિર્ન સન્દેહઃ સૌમ્યાસૌમ્યેષુ કર્મસુ ॥ ૧૭૬॥

લાભઃ પૃથ્વીકૃતોઽહ્નિ સ્યાન્નિશાયાં લાભકૃજ્જલમ્ ।
વહ્નૌ મૃત્યુઃ ક્ષયો વાયુર્નભઃસ્થાનં દહેત્ક્વચિત્ ॥ ૧૭૭॥

જીવિતવ્યે જયે લાભે કૃષ્યાં ચ ધનકર્મણિ ।
મન્ત્રાર્થે યુદ્ધપ્રશ્ને ચ ગમનાગમને તથા ॥ ૧૭૮॥

આયાતિ વારુણે તત્ત્વે શત્રુરસ્તિ શુભં ક્ષિતૌ ।
પ્રયાતિ વાયુતોઽન્યત્ર હાનિમૃત્યૂ નભોઽનલે ॥ ૧૭૯॥

અથ પ્રશ્નવિચારઃ ।

પૃથિવ્યાં મૂલચિન્તા સ્યાજ્જીવનસ્ય જલવાતયોઃ ।
તેજસા ધાતુચિન્તા સ્યાચ્છૂન્યાકાશતો વદેત્ ॥ ૧૮૦॥

પૃથિવ્યાં બહુપાદાઃ સ્યુર્દ્વિપદસ્તોયવાયુતઃ ।
તેજસ્યેવ ચતુષ્પાદો નભસા પાદવર્જિતઃ ॥ ૧૮૧॥

કુજો વહ્ની રવિઃ પૃથ્વી સૌરિરાપઃ પ્રકીર્તિતઃ ।
વાયુસ્થાનાસ્થિતો રાહુર્દક્ષરન્ધ્રપ્રવાહકઃ ॥ ૧૮૨॥

જલં ચન્દ્રો બુધઃ પૃથ્વી ગુરુર્વાતઃ સિતોઽનલઃ ।
વામનાડ્યાં સ્થિતાઃ સર્વે સર્વકાર્યેષુ નિશ્ચિતાઃ ॥ ૧૮૩॥

પૃથ્વી બુધો જલં ચેન્દુઃ શુક્રો વહ્ની રવિઃ કુજઃ ।
વાયૂ રાહુશ્શની વ્યોમ ગુરુરેવ પ્રકીર્તિતઃ ॥ ૧૮૪॥

પ્રશ્વાસપ્રશ્ન આદિત્યે યદિ રાહુર્ગતોઽનિલે ।
તદાઽસૌ ચલિતો જ્ઞેયઃ સ્થાનાન્તરમપેક્ષતે ॥ ૧૮૫॥

આયાતિ વારુણે તત્ત્વે તત્રૈવાસ્તિ શુભં ક્ષિતૌ ।
પ્રવાસી પવનેઽન્યત્ર મૃત્યુરેવાનલે ભવેત્ ॥ ૧૮૬॥

પાર્થિવે મૂલવિજ્ઞાનં શુભકાર્યં જલે તથા ।
આગ્નેયે ધાતુવિજ્ઞાનં વ્યોમ્નિ શૂન્યં વિનિર્દિશેત્ ॥ ૧૮૭॥

તુષ્ટિઃ પુષ્ટિ રતિઃક્રીડા જયહર્ષૌ ધરાજલે ।
તેજો વાય્વોશ્ચ સુપ્તાક્ષો જ્વરકમ્પઃ પ્રવાસિનઃ ॥ ૧૮૮॥

ગતાયુર્મૃત્યુરાકાશે તત્ત્વસ્થાને પ્રકીર્તિતા ।
દ્વાદશૈતાઃ પ્રયત્નેન જ્ઞાતવ્યા દૈશિકૈઃ સદા ॥ ૧૮૯॥

પૂર્વાયાં પશ્ચિમે યામ્યાં ઉત્તરસ્યાં તથાક્રમમ્ ।
પૃથીવ્યાદીનિ ભૂતાનિ બલિષ્ઠાનિ વિનિર્દિશેત્ ॥ ૧૯૦॥

અથ તત્ત્વગુણકથનમ્ ।
પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશમેવ ચ ।
પઞ્ચભૂતાત્મકો દેહો જ્ઞાતવ્યશ્ચ વરાનને ॥ ૧૯૧॥

અસ્થિમાંસં ત્વચા નાડી રોમઞ્ચૈવ તુ પઞ્ચમમ્ ।
પૃથ્વી પઞ્ચગુણાઃ પ્રોક્તા બ્રહ્મજ્ઞાનેન ભાષિતમ્ ॥ ૧૯૨॥

શુક્રશોણિતમજ્જાશ્ચ મૂત્રં લાલં ચ પઞ્ચમમ્ ।
આપઃ પઞ્ચગુણાઃ પ્રોક્તા બ્રહ્મજ્ઞાનેન ભાષિતમ્ ॥ ૧૯૩॥

ક્ષુધા તૃષા તથા નિદ્રા કાન્તિરાલસ્યમેવ ચ ।
તેજઃ પઞ્ચગુણં પ્રોક્તં બ્રહ્મજ્ઞાનેન ભાષિતમ્ ॥ ૧૯૪॥

ધાવનં ચલનં ગ્રન્થિઃ સઙ્કોચનપ્રસારણે ॥

વાયોઃ પઞ્ચગુણાઃ પ્રોક્તા બ્રહ્મજ્ઞાનેન ભાષિતમ્ ॥ ૧૯૫॥

રાગદ્વેષૌ તથા લજ્જા ભયં મોહશ્ચ પઞ્ચમઃ ।
નભઃ પઞ્ચગુણં પ્રોક્તં બ્રહ્મજ્ઞાનેન ભાષિતમ્ ॥ ૧૯૬॥

પૃથ્વ્યાઃ પલાનિ પઞ્ચાશચ્ચત્વારિંશત્તથામ્ભસઃ ।
અગ્નેસ્ત્રિંશત્પુનર્વાયો વિંશતિર્નભસો દશ ॥ ૧૯૭॥

પૃથિવ્યાં ચિરકાલેન લાભશ્ચાપઃ ક્ષણાદ્ભવેત્ ।
જાયતે પવને સ્વલ્પઃ સિદ્ધૌઽપ્યગ્નૌ વિનશ્યતિ ॥ ૧૯૮॥

પૃથ્વ્યાઃ પઞ્ચ હ્યપાં વેદા ગુણાસ્તેજો દ્વિવાયુતઃ ।
નભસ્યેકગુણશ્ચૈવ તત્ત્વજ્ઞાનમિદં ભવેત્ ॥ ૧૯૯॥

ફૂત્કારકૃત્પ્રસ્ફુટિતા વિદીર્ણા પતિતા ધરા ।
દદાતિ સર્વકાર્યેષુ અવસ્થાસદૃશં ફલમ્ ॥ ૨૦૦॥

અથ નક્ષત્રતત્ત્વકથનમ્ ।
ધનિષ્ઠા રોહિણી જ્યેષ્ઠાઽનુરાધા શ્રવણં તથા ।
અભિજિદુત્તરાષાઢા પૃથ્વીતત્ત્વમુદાહૃતમ્ ॥ ૨૦૧॥

પૂર્વાષાઢા તથાશ્લેષા મૂલમાર્દ્રા ચ રેવતી ।

ઉત્તરાભાદ્રપદા તોયતત્ત્વં શતભિષક્ પ્રિયે ॥ ૨૦૨॥

ભરણી કૃત્તિકાપુષ્યૌ મઘા પૂર્વા ચ ફલ્ગુની ।
પૂર્વાભાદ્રપદા સ્વાતી તેજસ્તત્ત્વમિતિ પ્રિયે ॥ ૨૦૩॥

વિષાખોત્તરફાલ્ગુન્યૌ હસ્તચિત્રે પુનર્વસુઃ ।
અશ્વિની મૃગશીર્ષે ચ વાયુતત્ત્વમુદાહૃતમ્ ॥ ૨૦૪॥

અથ સિદ્ધિવિચારઃ ।
વહન્નાડીસ્થિતો દૂતો યત્પૃચ્છતિ શુભાશુભમ્ ।
તત્સર્વં સિદ્ધિમાપનોતિ શૂન્યે શૂન્યં ન સંશયઃ ॥ ૨૦૫॥

પૂર્ણોઽપિ નિર્ગમશ્શ્વાસે સુતત્ત્વેઽપિ ન સિદ્ધિદઃ ।
સૂર્યશ્ચન્દ્રોઽથવા નૃણાં સઙ્ગ્રહે સર્વસિદ્ધિદઃ ॥ ૨૦૬॥

તત્ત્વે રામો જયં પ્રાપ્તઃ સુતત્ત્વે ચ ધનઞ્જયઃ ।
કૌરવા નિહતાઃ સર્વે યુદ્ધે તત્ત્વવિપર્યયાત્ ॥ ૨૦૭॥

જન્માન્તરીયસંસ્કારાત્પ્રસાદાદથવા ગુરોઃ ।
કેષાઞ્ચિજ્જાયતે તત્ત્વવાસના વિમલાત્મના ॥ ૨૦૮॥

અથ તત્ત્વબીજધ્યાનવર્ણનમ્ ।
લં બીજં ધરણીં ધ્યાયેચ્ચતુરસ્રાં સુપીતભામ્ ।
સુગન્ધાં સ્વર્ણવર્ણાભાં પ્રાપ્નુયાદ્દેહલાઘવમ્ ॥ ૨૦૯॥

વં બીજં વારુણં ધ્યાયેત્તત્ત્વમર્દ્ધશશિપ્રભમ્ ।
ક્ષુત્તૃષ્ણાદિસહિષ્ણુત્વં જલમધ્યે ચ મજ્જનમ્ ॥ ૨૧૦॥

રં બીજમગ્નિજં ધ્યાયેત્ત્રિકોણમરુણપ્રભમ્ ।
બહ્વન્નપાનભોક્તૃત્વમાતપાગ્નિસહિષ્ણુતા ॥ ૨૧૧॥

યં બીજં પવનં ધ્યાયેદ્વર્તુલં શ્યામલપ્રભમ્ ।
આકાશગમનાદ્યં ચ પક્ષિવદ્ગમનં તથા ॥ ૨૧૨॥

હં બીજં ગગનં ધ્યાયેન્નિરાકારં બહુપ્રભમ્ ।
જ્ઞાનં ત્રિકાલવિષયમૈશ્વર્યમણિમાદિકમ્ ॥ ૨૧૩॥

સ્વરજ્ઞાની નરો યત્ર ધનં નાસ્તિ તતઃ પરમ્ ।
ગમ્યતે તુ સ્વરજ્ઞાનં હ્યનાયાસં ફલં ભવેત્ ॥ ૨૧૪॥

શ્રી દેવ્યુવાચ ।

દેવ દેવ મહાદેવ મહાજ્ઞાનં સ્વરોદયમ્ ।
ત્રિકાલવિષયં ચૈવ કથં ભવતિ શઙ્કર ॥ ૨૧૫॥

ઈશ્વર ઉવાચ ।
અર્થકાલજયપ્રશ્નશુભાશુભમિતિ ત્રિધા ।
એતત્ત્રિકાલવિજ્ઞાનં નાન્યદ્ભવતિ સુન્દરિ ॥ ૨૧૬॥

તત્ત્વે શુભાશુભં કાર્યં તત્ત્વે જયપરાજયૌ ।
તત્ત્વે સુભિક્ષદુર્ભિક્ષે તત્ત્વં ત્રિપાદમુચ્યતે ॥ ૨૧૭॥

અથ પ્રાણગતિકથનમ્ ।

શ્રી દેવ્યુવાચ ।
દેવ દેવ મહાદેવ સર્વસંસારસાગરે ।
કિં નરાણાં પરં મિત્રં સર્વકાર્યાર્થસાધકમ્ ॥ ૨૧૮॥

ઈશ્વર ઉવાચ ।
પ્રાણ એવ પરં મિત્રં પ્રાણ એવ પરઃ સખા ।
પ્રાણતુલ્યો પરો બન્ધુર્નાસ્તિ નાસ્તિ વરાનને ॥ ૨૧૯॥

શ્રીદેવ્યુવાચ ।
કથં પ્રાણસ્થિતો વાયુર્દેહઃ કિં પ્રાણરૂપકઃ ।
તત્ત્વેષુ સઞ્ચરન્પ્રાણો જ્ઞાયતે યોગિભિઃ કથમ્ ॥ ૨૨૦॥

શ્રીશિવ ઉવાચ ।
કાયાનગરમધ્યસ્થો મારુતો રક્ષપાલકઃ ।
પ્રવેશે દશભિઃ પ્રોક્તો નિર્ગમે દ્વાદશાઙ્ગુલઃ ॥ ૨૨૧॥

ગમને તુ ચતુર્વિંશન્નેત્રવેદાસ્તુ ધાવને ।
મૈથુને પઞ્ચષષ્ઠિશ્ચ શયને ચ શતાઙ્ગુલમ્ ॥ ૨૨૨॥

પ્રાણસ્ય તુ ગતિર્દેવિ સ્વભાવાદ્દ્વાદશાઙ્ગુલા ।
ભોજને વમને ચૈવ ગતિરષ્ટાદશાઙ્ગુલમ્ ॥ ૨૨૩॥

એકાઙ્ગુલે કૃતે ન્યૂને પ્રાણે નિષ્કામતા મતા ।
આનન્દસ્તુ દ્વિતીયે સ્યાત્કવિશક્તિસ્તૃતીયકે ॥ ૨૨૪॥

વાચાં સિદ્ધિશ્ચતુર્થે ચ દૂરદૃષ્ટિસ્તુ પઞ્ચમે ।
ષષ્ઠે ત્વાકાશગમનં ચણ્ડવેગશ્ચ સપ્તમે ॥ ૨૨૫॥

અષ્ટમે સિદ્ધયશ્ચૈવ નવમે નિધયો નવ ।
દશમે દશમૂર્તિશ્ચ (દશરૂપાણિ)છાયાચૈકાદશે ભવેત્ ॥ ૨૨૬॥

દ્વાદશે હંસચારશ્ચ ગઙ્ગામૃતરસં પિબેત્ ।
આનખાગ્રં પ્રાણપૂર્ણે કસ્ય ભક્ષ્યં ચ ભોજનમ્ ॥ ૨૨૭॥

એવં પ્રાણવિધિઃ પ્રોક્તઃ સર્વકાર્યફલપ્રદઃ ।
જ્ઞાયતે ગુરુવાક્યેન ન વિદ્યાશાસ્ત્રકોટિભિઃ ॥ ૨૨૮॥

પ્રાતશ્ચન્દ્રો રવિઃ સાયં યદિ દૈવાન્ન લભ્યતે ।
મધ્યાહ્નમધ્યરાત્રાચ્ચ પરતસ્તુ પ્રવર્તતે ॥ ૨૨૯॥

અથ યુદ્ધપ્રકરણમ્ ।
દૂરયુદ્ધે જયી ચન્દ્રઃ સમાસન્ને દિવાકરઃ ।
વહન્નાડ્યાં ગતઃ પાદઃ સર્વસિદ્ધિપ્રદાયકઃ ॥ ૨૩૦॥

યાત્રારમ્ભે વિવાહે ચ પ્રવેશે નગરાદિકે ।
શુભકાર્યાણિ સિદ્ધ્યન્તિ ચન્દ્રચારેષુ સર્વદા ॥ ૨૩૧॥

અયનતિથિદિનેશૈઃ સ્ત્રીયતત્ત્વે ચ યુક્તે
યદિ વહતિ કદાચિદ્દૈવયોગેન પુંસામ્ ।
સ જયતિ રિપુસૈન્યં સ્તમ્ભમાત્રસ્વરેણ
પ્રભવતિ ન ચ વિઘ્નં કેશવસ્યાપિ લોકે ॥ ૨૩૨॥

જીવં રક્ષ જીવં રક્ષ જીવાઙ્ગે પરિધાય ચ ।
જીવો જપતિ યો યુદ્ધે જીવં જયતિ મેદિનીમ્ ॥ ૨૩૩॥

ભૂમૌ જલે ચ કર્ત્તવ્યં ગમનં શાન્તિકર્મસુ ।
વહ્નૌ વાયૌ પ્રદીપ્તેષુ ખે પુનર્નોભયેષ્વપિ ॥ ૨૩૪॥

જીવેન શસ્ત્રં બધ્નીયાજ્જીવેનૈવ વિકાશયેત્ ।
જીવેન પ્રક્ષિપેચ્છસ્ત્રં યુદ્ધે જયતિ સર્વદા ॥ ૨૩૫॥

આકૃષ્ય પ્રાણપવનં સમારોહેત વાહનમ્ ।
સમુત્તરે પદં દદ્યાત્ સર્વકાર્યાણિ સાધયેત્ ॥ ૨૩૬॥

અપૂર્ણે શત્રુસામગ્રી પૂર્ણે વા સ્વબલં તથા ।
કુરુતે પૂર્ણતત્ત્વસ્થો જયત્યેકો વસુન્ધરામ્ ॥ ૨૩૭॥

યા નાડી વહતે ચાઙ્ગે તસ્યામેવાધિદેવતા ।

સન્મુખેઽપિ દિશા તેષાં સર્વકાર્યફલપ્રદા ॥ ૨૩૮॥

આદૌ તુ ક્રિયતે મુદ્રા પશ્ચાદ્યુદ્ધં સમાચરેત્ ।
સર્પમુદ્રા કૃતા યેન તસ્ય સિદ્ધિર્ન સંશયઃ ॥ ૨૩૯॥

ચન્દ્રપ્રવાહેઽપ્યથ સૂર્યવાહે ભટાઃ સમાયાન્તિ ચ યોદ્ધુકામાઃ ।
સમીરણસ્તત્ત્વવિદાં પ્રતીતો યા શૂન્યતા સા પ્રતિકાર્યનાશમ્ ॥ ૨૪૦॥

યાં દિશં વહતે વાયુર્યુદ્ધં તદ્દિશિ દાપયેત્ ।
જયત્યેવ ન સન્દેહઃ શક્રોઽપિ યદિ ચાગ્રતઃ ॥ ૨૪૧॥

યત્ર નાડ્યાં વહેદ્વાયુસ્તદઙ્ગે પ્રાણમેવ ચ ।
આકૃષ્ય ગચ્છેત્કર્ણાન્તં જયત્યેવ પુરન્દરમ્ ॥ ૨૪૨॥

પ્રતિપક્ષપ્રહારેભ્યઃ પૂર્ણાઙ્ગે યોઽભિરક્ષતિ ।
ન તસ્ય રિપુભિઃ શક્તિર્બલિષ્ઠૈરપિ હન્યતે ॥ ૨૪૩॥

અઙ્ગુષ્ઠતર્જનીવંશે પાદાઙ્ગુષ્ઠે તથા ધ્વનિઃ ।
યુદ્ધકાલે ચ કર્ત્તવ્યો લક્ષયોદ્ધૃજયી ભવેત્ ॥ ૨૪૪॥

નિશાકરે રવૌ વારે મધ્યે યસ્ય સમીરણઃ ।
સ્થિતો રક્ષેદ્દિગન્તાનિ જયકાઙ્ક્ષી ગતઃ સદા ॥ ૨૪૫॥

શ્વાસપ્રવેશકાલે તુ દૂતો જલ્પતિ વાઞ્છિતમ્ ।
તસ્યાર્થઃ સિદ્ધિમાયાતિ નિર્ગમે નૈવ સુન્દરિ ॥ ૨૪૬॥

લાભાદીન્યપિ કાર્યાણિ પૃષ્ટાનિ કીર્ત્તિતાનિ ચ ।
જીવે વિશતિ સિદ્ધ્યન્તિ હાનિર્નિઃસરણે ભવેત્ ॥ ૨૪૭॥

નરે દક્ષ સ્વકીયા ચ સ્ત્રિયાં વામા પ્રશસ્યતે ।
કુમ્ભકો યુદ્ધકાલે ચ તિસ્રો નાડ્યસ્ત્રયીગતિઃ ॥ ૨૪૮॥

હકારસ્ય સકારસ્ય વિના ભેદં સ્વરઃ કથમ્ ।
સોઽહં હંસપદેનૈવ જીવો જપતિ સર્વદા ॥ ૨૪૯॥

શૂન્યાઙ્ગં પૂરિતં કૃત્વા જીવાઙ્ગે ગોપયેજ્જયમ્ ।
જીવાઙ્ગે ઘાતમાપ્નોતિ શૂન્યાઙ્ગે રક્ષતે સદા ॥ ૨૫૦॥

વામે વા યદિ વા દક્ષે યદિ પૃચ્છતિ પૃચ્છકઃ ।
પૂર્ણે ઘાતો ન જાયેત શૂન્યે ઘાતં વિનિર્દિશેત્ ॥ ૨૫૧॥

ભૂતત્ત્વેનોદરે ઘાતઃ પદસ્થાનેऽમ્બુના ભવેત્ ।
ઉરુસ્થાનેऽગ્નિતત્ત્વેન કરસ્થાને ચ વાયુના ॥ ૨૫૨॥

શિરસિ વ્યોમતત્ત્વે ચ જ્ઞાતવ્યો ઘાતનિર્ણયઃ ।
એવં પઞ્ચવિધો ઘાતઃ સ્વરશાસ્ત્રે પ્રકાશિતઃ ॥ ૨૫૩॥

યુદ્ધકાલે યદા ચન્દ્રઃ સ્થાયી જયતિ નિશ્ચિતમ્ ।
યદા સૂર્યપ્રવાહસ્તુ યાયી વિજયતે સદા ॥ ૨૫૪॥

જયમધ્યે તુ સન્દેહો નાડીમધ્યં તુ લક્ષયેત્ ।
સુષુમ્નાયાં ગતે પ્રાણે સમરે શત્રુસઙ્કટમ્ ॥ ૨૫૫॥

યસ્યાં નાડ્યા ભવેચ્ચારસ્તાં દિશં યુધિ સંશ્રયેત્ ।
તદાऽસૌ જયમાપ્નોતિ નાત્રકાર્યા વિચારણા ॥ ૨૫૬॥

યદિ સઙ્ગ્રામકાલે તુ વામનાડી સદા વહેત્ ।
સ્થાયિનો વિજયં વિદ્યાદ્રિપુવશ્યદયોऽપિ ચ ॥ ૨૫૭॥

યદિ સઙ્ગ્રામકાલે ચ સૂર્યસ્તુ વ્યાવૃતો વહેત્ ।
તદા યાયિજયં વિદ્યાત્ સદેવાસુરમાનવે ॥ ૨૫૮॥

રણે હરતિ શત્રુસ્તં વામાયાં પ્રવિશેન્નરઃ ।
સ્થાનં વિષુવચારેણ જયઃ સૂર્યેણ ધાવતા ॥ ૨૫૯॥

યુદ્ધદ્વયે કૃતે પ્રશ્ને પૂર્ણસ્ય પ્રથમે જયઃ ।
રિક્તે ચૈવ દ્વિતીયસ્તુ જયી ભવતિ નાન્યથા ॥ ૨૬૦॥

પૂર્ણનાડીગતઃ પૃષ્ઠે શૂન્યાઙ્ગં ચ તદાऽગ્રતઃ ।
શૂન્યસ્થાને કૃતઃ શત્રુર્મ્રિયતે નાત્ર સંશયઃ ॥ ૨૬૧॥

વામાચારે સમં નામ યસ્ય તસ્ય જયો ભવેત્ ।
પૃચ્છકો દક્ષિણે ભાગે વિજયી વિષમાક્ષરઃ ॥ ૨૬૨॥

યદા પૃચ્છતિ ચન્દ્રસ્ય તદા સન્ધાનમાદિશેત્ ।
પૃચ્છેદ્યદા તુ સૂર્યસ્ય તદા જાનીહિ વિગ્રહમ્ ॥ ૨૬૩॥

પાર્થિવે ચ સમં યુદ્ધં સિદ્ધિર્ભવતિ વારુણે ।
યુદ્ધે હિ તેજસો ભઙ્ગો મૃત્યુર્વાયૌ નભસ્યપિ ॥ ૨૬૪॥

અથ રુદ્ધસ્વરજ્ઞાનોપાયકથનમ્ ।

નિમિત્તતઃ પ્રમાદાદ્વા યદા ન જ્ઞાયતેऽનિલઃ ।

પૃચ્છાકાલે તદા કુર્યાદિદં યત્નેન બુદ્ધિમાન્ ॥ ૨૬૫॥

નિશ્ચલાં ધારણાં કૃત્વા પુષ્પં હસ્તાન્નિપાતયેત્ ।
પૂર્ણાઙ્ગે પુષ્પપતનં શૂન્યં વા તત્પરં ભવેત્ ॥ ૨૬૬॥

તિષ્ઠન્નુપવિશંશ્ચાપિ પ્રાણમાકર્ષયન્નિજમ્ ।
મનોભઙ્ગમકુર્વાણઃ સર્વકાર્યેષુ જીવતિ ॥ ૨૬૭॥

ન કાલો વિવિધં ઘોરં ન શસ્ત્રં ન ચ પન્નગાઃ ।
ન શત્રુવ્યાધિચૌરાદ્યાઃ શૂન્યસ્થાનાશિતું ક્ષમાઃ ॥ ૨૬૮॥

જીવેન સ્થાપયેદ્વાયું જીવેનારમ્ભયેત્પુનઃ ।
જીવેન ક્રીડતે નિત્યં દ્યુતે જયતિ સર્વદા ॥ ૨૬૯॥

સ્વરજ્ઞાનીબલાદગ્રે નિષ્ફલં કોટિધા ભવેત્ ।
ઇહલોકે પરત્રાપિ સ્વરજ્ઞાની બલી સદા ॥ ૨૭૦॥

દશશતાયુતં લક્ષં દેશાધિપબલં ક્વચિત્ ।
શતક્રતુ સુરેન્દ્રાણાં બલં કોટિગુણં ભવેત્ ॥ ૨૭૧॥

દેવ્યુવાચ ।
પરસ્પરં મનુષ્યાણાં યુદ્ધે પ્રોક્તો જયસ્ત્વયા ।
યમયુદ્ધે સમુત્પન્ને મનુષ્યાણાં કથં જયઃ ॥ ૨૭૨॥

ઈશ્વરોવાચ ।
ધ્યાયેદ્દેવં સ્થિરો જીવં જુહુયાજ્જીવ સઙ્ગમે ।
ઇષ્ટસિદ્ધિર્ભવેત્તસ્ય મહાલાભો જયસ્તથા ॥ ૨૭૩॥

નિરાકારાત્સમુત્પન્નં સાકારં સકલં જગત્ ।
તત્સાકારં નિરાકારજ્ઞાને ભવતિ તત્ક્ષણાત્ ॥ ૨૭૪॥

અથ વશીકરણપ્રકરણમ્ ।

શ્રીદેવ્યુવાચ ।
નરયુદ્ધં યમયુદ્ધં ત્વયા પ્રોક્તં મહેશ્વર ।
ઇદાનીં દેવદેવાનાં વશીકારણકં વદ ॥ ૨૭૫॥

ઈશ્વરોવાચ ।
ચન્દ્રં સૂર્યેણ ચાકૃષ્ય સ્થાપયેજ્જીવમણ્ડલે ।
આજન્મવશગા રામા કથિતેયં તપોધનૈઃ ॥ ૨૭૬॥

જીવેન ગૃહ્યતે જીવો જીવો જીવસ્ય દીયતે ।
જીવસ્થાને ગતો જીવો બાલા જીવાન્તકારકઃ ॥ ૨૭૭॥

રાત્ર્યન્તયામવેલાયાં પ્રસુપ્તે કામિનિજને ॥

બ્રહ્મજીવં પિબેદ્યસ્તુ બાલાપ્રાણહરો નરઃ ॥ ૨૭૮॥

અષ્ટાક્ષરં જપિત્વા તુ તસ્મિન્ કાલે ગતે સતિ ।
તત્ક્ષણં દીયતે ચન્દ્રો તુ મોહમાયાતિ કામિની ॥ ૨૭૯॥

શયને વા પ્રસઙ્ગે વા યુવત્યાલિઙ્ગનેઽપિ વા ।
યઃ સૂર્યેણ પિબેચ્ચન્દ્રં સ ભવેન્મકરધ્વજઃ ॥ ૨૮૦॥

શિવ આલિઙ્ગ્યતે શક્ત્યા પ્રસઙ્ગે દક્ષિણેઽપિ વા ।
તત્ક્ષણાદ્દાપયેદ્યસ્તુ મોહયેત્કામિનીશતમ્ ॥ ૨૮૧॥

સપ્ત નવ ત્રયઃ પઞ્ચ વારાન્સઙ્ગસ્તુ સૂર્યભે ।
ચન્દ્રે દ્વિતુયષટ્કૃત્વા વશ્યા ભવતિ કામિની ॥ ૨૮૨॥

સૂર્યચન્દ્રૌ સમાકૃષ્ય સર્પાક્રાન્ત્યાઽધરોષ્ઠયોઃ ।
મહાપદ્મે મુખં સ્પૃષ્ટ્વા વારં વારમિદં ચરેત્ ॥ ૨૮૩॥

આપ્રાણામિતિ પદ્મસ્ય યાવન્નિદ્રાવશં ગતા ।
પશ્ચાજ્જાગૃતિ વેલાયાં ચોષ્યતે ગલચક્ષુષી ॥ ૨૮૪॥

અનેન વિધિના કામી વશયેત્સર્વકામિનીઃ ।
ઇદં ન વાચ્યમસ્મિન્નિત્યાજ્ઞા પરમેશ્વરિ ॥ ૨૮૫॥

અથ ગર્ભપ્રકરણમ્ ।

ઋતુકાલભવા નારી પઞ્ચમેઽહ્નિ યદા ભવેત્ ।
સૂર્યચન્દ્રમસોર્યોગે સેવનાત્પુત્ર સમ્ભવઃ ॥ ૨૮૬॥

શઙ્ખવલ્લીં ગવાં દુગ્ધે પૃથ્વ્યાપો વહતે યદા ।
ભર્તુરેવ વદેદ્વાક્યં ગર્ભં દેહિ ત્રિભિર્વચઃ ॥ ૨૮૭॥

ઋતુસ્નાતા પિબેન્નારી ઋતુદાનં તુ યોજયેત્ ।
રૂપલાવણ્યસમ્પન્નો નરસિંહઃ પ્રસૂયતે ॥ ૨૮૮॥

સુષુમ્ના સૂર્યવાહેન ઋતુદાનં તુ યોજયેત્ ।
અઙ્ગીનઃ પુમાન્યસ્તુ જાયતે ત્રાસવિગ્રહઃ ॥ ૨૮૯॥

વિષમાઙ્કે દિવારાત્રૌ વિષમાઙ્કે દિનાધિપઃ ।
ચન્દ્રનેત્રાગ્નિતત્ત્વેષુ વન્ધ્યા પુત્રમવાપ્નુયાત્ ॥ ૨૯૦॥

ઋત્વારમ્ભે રવિઃ પુંસાં સ્ત્રીણાં ચ સુધાકરઃ ।
ઉભયોઃ સઙ્ગમે પ્રાપ્તો વન્ધ્યા પુત્રમવાપ્નુયાત્ ॥ ૨૯૧॥

ઋત્વારમ્ભે રવિઃ પુંસાં શુક્રાન્તે ચ સુધાકરઃ ।
અનેન ક્રમયોગેન નાદત્તે દૈવદારુકમ્ ॥ ૨૯૨॥

ચન્દ્રનાડી યદા પ્રશ્ને ગર્ભે કન્યા તદા ભવેત્ ।
સૂર્યો ભવેત્તદા પુત્રો દ્વયોર્ગર્ભો વિહન્યતે ॥ ૨૯૩॥

પૃથ્વ્યાં પુત્રી જલે પુત્રઃ કન્યકા તુ પ્રભઞ્જને ।
ગર્ભપાતસ્તેજસિ સ્યાન્નભસ્યપિ નપુંસકઃ ॥ ૨૯૪॥

ચન્દ્રે સ્ત્રી પુરુષઃ સૂર્યે મધ્યમાર્ગે નપુંસકઃ ।
ગર્ભપ્રશ્ને યદા દૂતઃ પૂર્ણે પુત્રઃ પ્રજાયતે ॥ ૨૯૫॥

શૂન્યે શૂન્યં યુગે યુગ્મં ગર્ભપાતશ્ચ સઙ્ક્રમે ।
તત્ત્વવિત્સ વિજાનીયાત્કથિતં તત્તુ સુન્દરિ ॥ ૨૯૬॥

ગર્ભાધાનં મારુતે સ્યાચ્ચ દુઃખી દિક્ષુ ખ્યાતો વારુણે સૌખ્યયુક્તઃ ।
ગર્ભસ્રાવઃ સ્વલ્પજીવશ્ચ વહ્નૌ ભોગી ભવ્યઃ પાર્થિવેનાર્થયુક્તઃ ॥ ૨૯૭॥

ધનવાન્સૌખ્યયુક્તશ્ચ ભોગવાનર્થસંસ્થિતિઃ ।
સ્યાન્નિત્યં વારુણે તત્ત્વે વ્યોમ્નિ ગર્ભો વિનશ્યતિ ॥ ૨૯૮॥

માહેન્દ્રે સુસુતોત્પત્તિર્વારુણે દુહિતા ભવેત્ ।
શેષેષુ ગર્ભહાનિઃ સ્યાજ્જાતમાત્રસ્ય વા મૃતિઃ ॥ ૨૯૯॥

રવિમધ્યગતશ્ચન્દ્રશ્ચન્દ્રમધ્યગતો રવિઃ ।
જ્ઞાતવ્યં ગુરુતઃ શીઘ્રં ન વેદશાસ્ત્રકોટિભિઃ ॥ ૩૦૦॥

અથ સંવત્સરફલકથનમ્ ।

ચૈત્રશુક્લપ્રતિપદિ પ્રાતસ્તત્ત્વવિભેદતઃ ।
પશ્યેદ્વિચક્ષણો યોગી દક્ષિણ ચોત્તરાયણે ॥ ૩૦૧॥

ચન્દ્રોદયસ્ય વેલાયાં વહમાનોઽત્ર તત્ત્વતઃ ।
પૃથિવ્યાપસ્તથા વાયુઃ સુભિક્ષં સર્વસસ્યજમ્ ॥ ૩૦૨॥

તેજોવ્યોમ્નોર્ભયં ઘોરં દુર્ભિક્ષં કાલતત્ત્વતઃ ।

એવં તત્ત્વફલં જ્ઞેયં વર્ષે માસે દિનેષ્વપિ ॥ ૩૦૩॥

મધ્યમા ભવતિ ક્રૂરા દુષ્ટા સર્વેષુ કર્મસુ ।
દેશભઙ્ગમહારોગક્લેષકષ્ટાદિદુઃખદા ॥ ૩૦૪॥

મેષસઙ્ક્રાન્તિવેલાયાં સ્વરભેદં વિચારયેત્ ।
સંવત્સરફલં બ્રૂયાલ્લોકાનાં તત્ત્વચિન્તકઃ ॥ ૩૦૫॥

પૃથિવ્યાદિકતત્ત્વેન દિનમાસાબ્દજં ફલમ્ ।
શોભનં ચ યથા દુષ્ટં વ્યોમમારુતવહ્નિભિઃ ॥ ૩૦૬॥

સુભિક્ષં રાષ્ટ્રવૃદ્ધિઃ સ્યાદ્બહુસસ્યા વસુન્ધરા ।
બહુવૃષ્ટિસ્તથા સૌખ્યં પૃથ્વીતત્ત્વં વહેદ્યદિ ॥ ૩૦૭॥

અતિવૃષ્ટિઃ સુભિક્ષં સ્યાદારોગ્યં સૌખ્યમેવ ચ ।
બહુસસ્યા તથા પૃથ્વી અપ્તત્ત્વં વહેદ્યદિ ॥ ૩૦૮॥

દુર્ભિક્ષં રાષ્ટ્રભઙ્ગઃ સ્યાદુત્પત્તિશ્ચ વિનશ્યતિ ।
અલ્પાદલ્પતરા વૃષ્ટિરગ્નિતત્ત્વં વહેદ્યદિ ॥ ૩૦૯॥

ઉત્પાતોપદ્રવાઃ ભીતિરલ્પા વૃષ્ટિસ્યુરીતયઃ ।
મેષસઙ્ક્રાન્તિવેલાયાં વાયુતત્ત્વં વહેદ્યદિ ॥ ૩૧૦॥

મેષસઙ્ક્રાન્તિવેલાયાં વ્યોમતત્ત્વં વહેદ્યદિ ।
તત્રાપિ શૂન્યતા જ્ઞેયા સસ્યાદીનાં સુખસ્ય ચ ॥ ૩૧૧॥

પૂર્ણપ્રવેશને શ્વાસે સસ્યં તત્ત્વેન સિદ્ધ્યતિ ।
સૂર્યચન્દ્રેઽન્યથાભૂતે સઙ્ગ્રહઃ સર્વસિદ્ધિદઃ ॥ ૩૧૨॥

વિષમે વહ્નિતત્ત્વં સ્યાજ્જ્ઞાયતે કેવલં નભઃ ।
તત્કુર્યાદ્વસ્તુસઙ્ગ્રાહો દ્વિમાસે ચ મહર્ઘતા ॥ ૩૧૩॥

રવૌસઙ્ક્રમતે નાડી ચન્દ્રમન્તે પ્રસર્પિતા ।
ખાનિલે વહ્નિયોગેન રૌરવં જગતીતલે ॥ ૩૧૪॥

અથ રોગપ્રકરણમ્ ।

મહીતત્ત્વે સ્વરોગશ્ચ જલે ચ જલમાતૃતઃ ।
તેજસી ખેટવાટીસ્થા શાકિનીપિતૃદોષતઃ ॥ ૩૧૫॥

આદૌ શૂન્યાગતો દૂતઃ પશ્ચાત્પૂર્ણે વિશેદ્યદિ ।
મૂર્ચ્છિતોઽપિ ધ્રુવં જીવેદ્યદર્થં પ્રતિપૃચ્છતિ ॥ ૩૧૬॥

યસ્મિન્નઙ્ગે સ્થિતો જીવસ્તત્રસ્થઃ પરિપૃચ્છતિ ।
તદા જીવતિ જીવોઽસૌ યદિ રોગૈરુપદ્રુતઃ ॥ ૩૧૭॥

દક્ષિણેન યદા વાયુર્દૂતો રૌદ્રાક્ષરો વદેત્ ।
તદા જીવતિ જીવોઽસૌ ચન્દ્રે સમફલં ભવેત્ ॥ ૩૧૮॥

જીવાકારઞ્ચ વા ધૃત્વા જીવાકારં વિલોક્ય ચ ।
જીવાસ્થો જીવિતપ્રશ્ને તસ્ય સ્યાજ્જીવિતં ફલમ્ ॥ ૩૧૯॥

વામાચારે તથા દક્ષપ્રવેશે યત્ર વાહને ।
તત્રસ્થઃ પૃચ્છતે દૂતસ્તસ્ય સિદ્ધિર્ન સંશયઃ ॥ ૩૨૦॥

પ્રશ્ને ચાધઃસ્થિતો જીવો નૂનં જીવો હિ જીવતિ ।
ઊર્ધ્વચારસ્થિતો જીવો જીવો યાતિ યમાલયમ્ ॥ ૩૨૧॥

વિપરીતાક્ષરપ્રશ્ને રિક્તાયાં પૃચ્છકો યદિ ।
વિપર્યયં ચ વિજ્ઞેયં વિષમસ્યોદયે સતિ ॥ ૩૨૨॥

ચન્દ્રસ્થાને સ્થિતો જીવઃ સૂર્યસ્થાને તુ પૃચ્છકઃ ।
તદા પ્રાણવિયુક્તોઽસૌ યદિ વૈદ્યશતૈર્વૃતઃ ॥ ૩૨૩॥

પિઙ્ગલાયાં સ્થિતો જીવો વામે દૂતસ્તુ પૃચ્છતિ ।
તદાઽપિ મ્રિયતે રોગી યદિ ત્રાતા મહેશ્વરઃ ॥ ૩૨૪॥

એકસ્ય ભૂતસ્ય વિપર્યયેણ રોગાભિભૂતિર્ભવતીહ પુંસામ્ ।
તયોર્દ્વયોર્બન્ધુસુહૃદ્વિપત્તિઃ પક્ષદ્વયે વ્યત્યયતો મૃતિઃ સ્યાત્ ॥ ૩૨૫॥

અથ કાલપ્રકરણમ્ ।

માસાદૌ ચૈવ પક્ષાદૌ વત્સરાદૌ યથાક્રમમ્ ।
ક્ષયકાલં પરીક્ષેત વાયુચારવશાત્સુધીઃ ॥ ૩૨૬॥

પઞ્ચભૂતાત્મકં દીપં શિવસ્નેહેન સિઞ્ચિતમ્ ।
રક્ષયેત્સૂર્યવાતેન પ્રાણી જીવઃ સ્થિરો ભવેત્ ॥ ૩૨૭॥

મારુતં બન્ધયિત્વા તુ સૂર્યં બન્ધયતે યદિ ।
અભ્યાસાજ્જીવતે જીવઃ સૂર્યકાલેઽપિ વઞ્ચિતે ॥ ૩૨૮॥

ગગનાત્સ્રવતે ચન્દ્ર કાયપદ્માનિ સિઞ્ચયેત્ ।
કર્મયોગસદાભ્યાસૈરમરઃ શશિસંશ્રયાત્ ॥ ૩૨૯॥

શશાङ્કં વારયેદ્રાત્રૌ દિવા વાર્યો દિવાકરઃ ।
ઇત્યભ્યાસરતો નિત્યં સ યોગી નાત્ર સંશયઃ ॥ ૩૩૦॥

અહોરાત્રે યદૈકત્ર વહતે યસ્ય મારુતઃ ।
તદા તસ્ય ભવેન્મૃત્યુઃ સમ્પૂર્ણે વત્સરત્રયે ॥ ૩૩૧॥

અહોરાત્રદ્વયં યસ્ય પિઙ્ગલાયાં સદા ગતિઃ ।
તસ્ય વર્ષદ્વયં પ્રોક્તં જીવિતં તત્ત્વવેદિભિઃ ॥ ૩૩૨॥

ત્રિરાત્રં વહતે યસ્ય વાયુરેકપુટે સ્થિતઃ ।
તદા સંવત્સરાયુસ્તં પ્રવદન્તિ મનીષિણઃ ॥ ૩૩૩॥

રાત્રૌ ચન્દ્રો દિવા સૂર્યો વહેદ્યસ્ય નિરન્તરમ્ ।
જાનીયાત્તસ્ય વૈ મૃત્યુઃ ષણ્માસાભ્યન્તરે ભવેત્ ॥ ૩૩૪॥

લક્ષ્યં લક્ષતિ લક્ષણેન સલિલે ભાનુર્યદા દૃશ્યતે
ક્ષીણો દક્ષિણપશ્ચિમોત્તરપુરઃ ષટ્ત્રિદ્વિમાસૈકતઃ ।
મધ્યં છિદ્રમિદં ભવેદ્દશદિનં ધૂમાકુલં તદ્દિને
સર્વજ્ઞૈરભિભાષિતં મુનિવરૈરાયુઃ પ્રમાણં સ્ફુટમ્ ॥ ૩૩૫॥

દૂતઃ કૃષ્ણકષાયકૃષ્ણવસનો દન્તક્ષતો મુણ્ડિત-
સ્તૈલાભ્યક્તશરીરરજ્જુકરો દીનશ્ચ પૂર્ણોત્તરઃ ।
ભસ્માઙ્ગારકપાલપાશમુસલી સૂર્યાસ્તમાયાતિ યઃ
કાલીશૂન્યપદસ્થિતો ગદયુતઃકાલાનલસ્યાહતઃ(દૃત)॥ ૩૩૬॥

અકસ્માચ્ચિત્તવિકૃતિરકસ્માત્પુરુષોત્તમઃ ।
અકસ્માદિન્દ્રિયોત્પાતઃ સન્નિપાતાગ્રલક્ષણમ્ ॥ ૩૩૭॥

શરીરં શીતલં યસ્ય પ્રકૃતિર્વિકૃતા ભવેત્ ।
તદરિષ્ટં સમાસેન વ્યાસતસ્તુ નિબોધ મે ॥ ૩૩૮॥

દુષ્ટશબ્દેષુ રમતે શુદ્ધશબ્દેષુ ચાપ્યતિ ।
પશ્ચાત્તાપો ભવેદ્યસ્ય તસ્ય મૃત્યુર્ન સંશયઃ ॥ ૩૩૯॥

હુङ્કારઃ શીતલો યસ્ય ફુત્કારો વહ્નિસન્નિભઃ ।
મહાવૈદ્યો ભવેત્તસ્ય તસ્ય મૃત્યુર્ભવેદ્ધ્રુવમ્ ॥ ૩૪૦॥

જિહ્વાં વિષ્ણુપદં ધ્રુવં સુરપદં સન્માતૃકામણ્ડલ-
મેતાન્યેવમરુન્ધતીમમૃતગું શુક્રં ધ્રુવં વા ક્ષણમ્ ।

એતેષ્વેકમપિ સ્ફુટં ન પુરુષઃ પશ્યેત્પુરઃ પ્રેષિતઃ
સોઽવશ્યં વિશતીહ કાલવદનં સંવત્સરાદૂર્ધ્વતઃ ॥ ૩૪૧॥

અરશ્મિબિમ્બં સૂર્યસ્ય વહ્નેઃ શીતાંશુમાલિનઃ ।
દૃષ્ટ્વૈકાદશમાસાયુર્નરશ્ચોર્ધ્વં ન જીવતિ ॥ ૩૪૨॥

વાપ્યાં પુરીષમૂત્રાણિ સુવર્ણં રજતં તથા ।
પ્રત્યક્ષમથવા સ્વપ્ને દશમાસાન્ન જીવતિ ॥ ૩૪૩॥

ક્વચિત્પશ્યતિ યો દીપં સુવર્ણં ચ કષાન્વિતમ્ ।
વિરૂપાણિ ચ ભૂતાનિ નવમાસાન્ન જીવતિ ॥ ૩૪૪॥

સ્થૂલાઙ્ગોઽપિ કૃશઃ કૃશોઽપિ સહસા સ્થૂલત્વમાલભ્યતે
પ્રાપ્તો વા કનકપ્રભાં યદિ ભવેત્ક્રૂરોઽપિ કૃષ્ણચ્છવિઃ ।
શૂરો ભીરુસુધીરધર્મનિપુણઃ શાન્તો વિકારી પુમા-
ન્નિત્યેવં પ્રકૃતિઃ પ્રયાતિ ચલનં માસાષ્ટકં જીવતિ ॥ ૩૪૫॥

પીડા ભવેત્પાણિતલે ચ જિહ્વા-
મૂલે તથા સ્યાદ્રુધિરં ચ કૃષ્ણમ્ ।
વિદ્ધં ન સ (ચ)ગ્લાયતિ યત્ર દૃષ્ટ્યા
જીવેન્મનુષ્યઃ સ હિ સપ્તમાસાન્ ॥ ૩૪૬॥

મધ્યાઙ્ગુલીનાં ત્રિતયં ન વક્રં
રોગં વિના શુષ્યતિ યસ્ય કણ્ઠઃ ।
મુહુર્મુહુઃ પ્રશ્નવશેન જાડ્યાત્-
ષડ્ભિઃ સ માસૈઃ પ્રલયં પ્રયાતિ ॥ ૩૪૭॥

ન યસ્ય સ્મરણં કિઞ્ચિદ્વિદ્યતે સ્તનચર્માણિ ।
સોઽવશ્યં પઞ્ચમે માસે સ્કન્ધારૂઢો ભવિષ્યતિ ॥ ૩૪૮॥

યસ્ય ન સ્ફુરતિ જ્યોતિઃ પીડ્યતે નયનદ્વયમ્ ।
મરણં તસ્ય નિર્દિષ્ટં ચતુર્થે માસે નિશ્ચિતમ્ ॥ ૩૪૯॥

દન્તાશ્ચ વૃષણૌ યસ્ય ન કિઞ્ચિદપિ પીડ્યતે ।
તૃતીયં માસમાવશ્યં કાલાજ્ઞાયાં ભવેન્નરઃ ॥ ૩૫૦॥

અથ છાયાપુરુષકથનમ્ ।

કાલો દૂરસ્થિતો વાઽપિ યેનોપાયેન લક્ષ્યતે ।
તં વદામિ સમાસેન યથાઽઽદિષ્ટં શિવાગમે ॥ ૩૫૧॥

એકાન્તં વિજનં ગત્વા કૃત્વાऽऽદિત્યં ચ પૃષ્ઠતઃ ।
નિરીક્ષયેન્નિજચ્છાયાં કણ્ઠદેશે સમાહિતઃ ॥ ૩૫૨॥

તતશ્ચાકાશમીક્ષેત હ્રીં પરબ્રહ્મણે નમઃ ।
અષ્ટોત્તરશતં જપ્ત્વા તતઃ પશ્યતિ શઙ્કરમ્ ॥ ૩૫૩॥

શુદ્ધસ્ફટિકસઙ્કાશં નાનારૂપધરં હરમ્ ।
ષણ્માસાભ્યાસયોગેન ભૂચરાણાં પતિર્ભવેત્ ।
વર્ષદ્વયેન તે નાથ કર્ત્તા હર્ત્તા સ્વયં પ્રભુઃ ॥ ૩૫૪॥

ત્રિકાલજ્ઞત્વમાપ્નોતિ પરમાનન્દમેવ ચ ।
સતતાભ્યાસયોગેન નાસ્તિ કિઞ્ચિત્સુદુર્લભમ્ ॥ ૩૫૫॥

તદ્રૂપં કૃષ્ણવર્ણં યઃ પશ્યતિ વ્યોમ્નિ નિર્મલે ।
ષણ્માસાન્મૃત્યુમાપ્નોતિ સ યોગી નાત્ર સંશયઃ ॥ ૩૫૬॥

પીતે વ્યાધિં ભયં રક્તે નીલે હાનિં ચ વિનિર્દિશેત્ ।
નાનાવર્ણોऽથ ચેત્તસ્મિન્સિદ્ધશ્ચ ગીયતે મહાન્ ॥ ૩૫૭॥

પદે ગુલ્ફે ચ જઠરે વિનાશઃ ક્રમશો ભવેત્ ।
વિનશ્યતો યદા બાહૂ સ્વયં તુ મ્રિયતે ધ્રુવમ્ ॥ ૩૫૮॥

વામબાહુસ્તથા ભાર્યા નશ્યતેતિ ન સંશયઃ ।
દક્ષિણે બન્ધુનાશો હિ મૃત્યું માસં વિનિર્દિશેત્ ॥ ૩૫૯॥

અશિરો માસમરણં વિના જઙ્ઘં દિનાષ્ટકમ્ ।
અષ્ટાભિઃ સ્કન્ધનાશેન છાયાલોપેન તત્ક્ષણાત્ ॥ ૩૬૦॥

પ્રાતઃ પૃષ્ઠગતે રવૌ ચ નિમિષાચ્છાયાઙ્ગુલીશ્ચાધરં
દૃષ્ટ્વાऽર્ધેન મૃતિસ્ત્વનન્તરમહો છાયાં નરઃ પશ્યતિ ।
તત્કર્ણાંસકરાસ્ય પાર્શ્વહૃદયાભાવે ક્ષણાર્ધાત્સ્વયં
દિઙ્મૂઢો હિ નરઃશિરોવિગમતો માસાંસ્તુ ષડ્જીવતિ ॥ ૩૬૧॥

અથ આસન્નમૃત્યુલક્ષણનિરૂપણમ્ ।
એકાદિષોડશાહાનિ યદિ ભાનુર્નિરન્તરમ્ ।
વહેદ્યસ્ય ચ વૈ મૃત્યુઃ શેષાહેન માસિકઃ(કે)॥ ૩૬૨॥

સમ્પૂર્ણં વહતે સૂર્યશ્ચન્દ્રમાં નૈવ દૃશ્યતે ।

પક્ષેણ જાયતે મૃત્યુઃ કાલજ્ઞેનાન ભાષિતમ્ ॥ ૩૬૩॥

મૂત્રં પુરીષં વાયુશ્ચ સમકાલં પ્રવર્તતે ।
તદાઽસૌ ચલિતો જ્ઞેયો દશાહે મ્રિયતે ધ્રુવમ્ ॥ ૩૬૪॥

સમ્પૂર્ણં વહતે ચન્દ્રઃ સૂર્યો નૈવ ચ દૃશ્યતે ।
માસેન જાયતે મૃત્યુઃ કાલજ્ઞેનાન ભાષિતમ્ ॥ ૩૬૫॥

અરુન્ધતીં ધ્રુવં ચૈવ વિષ્ણોસ્ત્રીણિ પદાનિ ચ ।
આયુર્હીના ન પશ્યન્તિ ચતુર્થં માતૃમણ્ડલમ્ ॥ ૩૬૬॥

અરુન્ધતી ભવેજ્જિહ્વા ધ્રુવો નાસાગ્રમેવ ચ ।
ભ્રુવૌ વિષ્ણુપદં જ્ઞેયં તારકં માતૃમણ્ડલમ્ ॥ ૩૬૭॥

નવ ભ્રુવં સપ્ત ઘોષં પઞ્ચ તારાં ત્રિનાસિકામ્ ।
જિહ્વામેકદિનં પ્રોક્તં મ્રિયતે માનવો ધ્રુવમ્ ॥ ૩૬૮॥

કોણાવક્ષ્ણોરઙ્ગુલિભ્યાં કિઞ્ચિત્પીડ્ય નિરીક્ષયેત્ ।
(કોણાવક્ષ્ણોરઙ્ગુલિભ્યાં કિઞ્ચિદાપીડ્ય લોકયેત્ ।)
યદા ન દૃશ્યતે બિન્દુર્દશાહેન ભવેન્મૃતિઃ ॥ ૩૬૯॥

તીર્થસ્નાનેન દાનેન તપસા સુકૃતેન ચ ।
જપૈર્ધ્યાનેન યોગેન જાયતે કાલવઞ્ચના ॥ ૩૭૦॥

શરીરં નાશયન્ત્યેતે દોષા ધાતુમલાસ્તથા ।
સમસ્તુ વાયુર્વિજ્ઞેયો બલતેજોવિવર્ધનઃ ॥ ૩૭૧॥

રક્ષણીયસ્તતો દેહો યતો ધર્માદિસાધનમ્ ।

અથ યોગપ્રકરણમ્ ।

યોગાભ્યાસાત્વમાયાન્તિ સાધુજપ્યાસ્તુ સાધ્યતામ્ ।
અસાધ્યાઞ્જીવિતં ઘ્નન્તિ ન તત્રાસ્તિ પ્રતિક્રિયા ॥ ૩૭૨॥

યેષાં હૃદિ સ્ફુરતિ શાશ્વતમદ્વિતીયં
તેજસ્તમોનિવહનાશકરં રહસ્યમ્ ।
તેષામખણ્ડશશિરમ્યસુકાન્તિભાજાં
સ્વપ્નેઽપિ નો ભવતિ કાલભયં નરાણામ્ ॥ ૩૭૩॥

ઇડા ગઙ્ગેતિ વિજ્ઞેયા પિઙ્ગલા યમુના નદી ।
મધ્યે સરસ્વતીં વિદ્યાત્પ્રયાગાદિસમં તથા ॥ ૩૭૪॥

આદૌ સાધનમાખ્યાતં સદ્યઃ પ્રત્યયકારકમ્ ।
બદ્ધપદ્માસનો યોગી બન્ધયેદુડ્ડિયાનકમ્ ॥ ૩૭૫॥

પૂરકઃ કુમ્ભકશ્ચૈવ રેચકશ્ચ તૃતીયકઃ ।
જ્ઞાતવ્યો યોગિભિર્નિત્યં દેહસંશુદ્ધિહેતવે ॥ ૩૭૬॥

પૂરકઃ કુરુતે ધૃષ્ટિં ધાતુસામ્યં તથૈવ ચ ।
કુમ્ભકઃ સ્તમ્ભનં કુર્યાજ્જીવરક્ષાવિવર્દ્ધનમ્ ॥ ૩૭૭॥

રેચકો હરતે પાપં કુર્યાદ્યોગપદં વ્રજેત્ ।
પશ્ચાત્સઙ્ગ્રામવત્તિષ્ઠેલ્લયબન્ધં ચ કારયેત્ ॥ ૩૭૮॥

કુમ્ભયેત્સહજં વાયું યથાશક્તિ પ્રકલ્પયેત્ ।
રેચયેચ્ચન્દ્રમાર્ગેણ સૂર્યેણાપૂરયેત્સુધીઃ ॥ ૩૭૯॥

ચન્દ્રં પિબતિ સૂર્યશ્ચ સૂર્યં પિબતિ ચન્દ્રમાઃ ।
અન્યોન્યકાલભાવેન જીવેદાચન્દ્રતારકમ્ ॥ ૩૮૦॥

સ્વીયાઙ્ગે વહતે નાડી તન્નાડીરોધનં કુરુ ।
મુખબન્ધમમુઞ્ચન્વૈ પવનં જાયતે યુવા ॥ ૩૮૧॥

મુખનાસાક્ષિકર્ણાન્તાનઙ્ગુલીભિર્નિરોધયેત્ ।
તત્ત્વોદયમિતિ જ્ઞેયં ષણ્મુખીકરણં પ્રિયમ્ ॥ ૩૮૨॥

તસ્ય રૂપં ગતિઃ સ્વાદો મણ્ડલં લક્ષણં ત્વિદમ્ ।
સ વેત્તિ માનવો લોકે સંસર્ગાદપિ માર્ગવિત્ ॥ ૩૮૩॥

નિરાશો નિષ્કલો યોગી ન કિઞ્ચિદપિ ચિન્તયેત્ ।
વાસનામુન્મનાં કૃત્વા કાલં જયતિ લીલયા ॥ ૩૮૪॥

વિશ્વસ્ય વેદિકાશક્તિર્નેત્રાભ્યાં પરિદૃશ્યતે ।
તત્રસ્થં તુ મનો યસ્ય યામમાત્રં ભવેદિહ ॥ ૩૮૫॥

તસ્યાયુર્વર્ધતે નિત્યં ઘટિકાત્રયમાનતઃ ।
શિવેનોક્તં પુરા તન્ત્રે સિદ્ધસ્ય ગુણગહ્વરે ॥ ૩૮૬॥

બદ્ધ્વા પદ્માસનં યે ગુદગતપવનં સન્નિરુદ્ધ્યામુમુચ્ચૈસ્તં
તસ્યાપાનરન્ધ્રક્રમજિતમનિલપ્રાણશક્ત્યાનિરુદ્ધ્ય ।
એકીભૂતં સુષુમ્નાવિવરમુપગતં બ્રહ્મરન્ધ્રં ચ નીત્વા
નિક્ષિપ્યાકાશમાર્ગે શિવચરણરતા યાન્તિ તે કેઽપિ ધન્યાઃ ॥ ૩૮૭॥

એતજ્જાનાતિ યો યોગી એતત્પઠતિ નિત્યશઃ ।
સર્વદુઃખવિનિર્મુક્તો લભતે વાઞ્છિતં ફલમ્ ॥ ૩૮૮॥

અથ સ્વરજ્ઞાનપ્રશંસા ।
સ્વરજ્ઞાનં નરે યત્ર લક્ષ્મીપાદતલે ભવેત્ ।
સર્વત્ર ચ શરીરેઽપિ સુખં તસ્ય સદા ભવેત્ ॥ ૩૮૯॥

પ્રણવઃ સર્વવેદાનાં બ્રાહ્મણો ભાસ્કરો યથા ।
મૃત્યુલોકે તથા પૂજ્યઃ સ્વરજ્ઞાની પુમાનપિ ॥ ૩૯૦॥

નાડીત્રયં વિજાનાતિ તત્ત્વજ્ઞાનં તથૈવ ચ ।
નૈવ તેન ભવેત્તુલ્યં લક્ષકોટિરસાયનમ્ ॥ ૩૯૧॥

એકાક્ષરપ્રદાતારં નાડીભેદવિવેચકમ્ ।
પૃથિવ્યાં નાસ્તિ તદ્દ્રવ્યં યદ્દત્ત્વાચાનૃણં ભવેત્ ॥ ૩૯૨॥

સ્વરતત્ત્વં તથા યુદ્ધં દેવિ વશ્યં સ્ત્રિયસ્તથા ।
ગર્ભાધાનં ચ રોગશ્ચ કલાર્ધનૈવ મુચ્યતે ॥ ૩૯૩॥

એવં પ્રવર્તિતં લોકે પ્રસિદ્ધં સિદ્ધયોગિભિઃ ।
ચન્દ્રાર્કગ્રહણે જાપ્યં પઠતાં સિદ્ધિદાયકમ્ ॥ ૩૯૪॥

સ્વસ્થાને તુ સમાસીનો નિદ્રાં ચાહારમલ્પકમ્ ।
ચિન્તયેત્પરમાત્માનં યો વેદ સ ભવિષ્યતિ ॥ ૩૯૫॥

ઇત્યુમામહેશ્વરસંવાદે સ્વરોદયજ્ઞાનં સમ્પૂર્ણમ્ ।

Proofread by Ruma Dewan

---

*Shivasvarodayah*
pdf was typeset on January 19, 2026

Please send corrections to *sanskrit@cheerful.com*